Digitized by eGangotri and Sarayu Trust.

A35,6

Pl No. 435

THE KUSUMÁNJALI,

OR

HINDU PROOF OF THE EXISTENCE OF A SUPREME BEING,

BY

UDAYANA ÁCHÁRYA,

WITH THE

COMMENTARY OF HARI DÁSA BHAṬṬÁCHÁRYA,

EDITED AND TRANSLATED BY

E. B. ÇOWELL, M. A.,

ASSISTED BY

PAṆḌITA MAHE'SA ÇHANDRA NYÁYARATNA.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS, CIRCULAR ROAD.

1864.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

TO

PROFESSOR MAX MÜLLER,

IN MEMORY OF

OLD OXFORD DAYS.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

PREFACE.

THE following treatise is very celebrated amongst Hindu logicians, and, however little it may be calculated to interest the general English reader, it will certainly not be without a use and interest to those Europeans whose studies are directed to the higher branches of Sanskrit literature. They will hardly fail to be attracted by a work which, though obscure and technical, professes to grapple, from a Hindu standing-point, with the world-old problem, how the existence of the Supreme Being is to be proved; and perhaps those who are interested in the history of philosophy may turn over some of the pages with curiosity, especially when they occasionally recognise old familiar arguments and objections in their quaint Oriental disguise. The Kusumánjali is as much inferior to the tenth book of Plato's Laws or the twelfth of Aristotle's Metaphysics, as Hindu philosophy itself is to that of Greece; but nothing can rob India of the merit of an original system of logic and metaphysics, unborrowed from any other land. It has been said that the past history of philosophy is the record of glorious failures in the attempt to solve an insuperable problem; and it cannot be uninteresting to trace the brave efforts of a Hindu thinker, far away from the circle of Christianity, who, perplexed by the doubts or open disbelief taught in many of the systems current in his day, endeavoured, however vainly, to build for his countrymen the first truth of Theology on a firm logical foundation.

——— Audacia certè
Laus erit; in magnis et voluisse sat est.

Udayana Ácharya, like nearly every old Hindu writer, is a *name* and nothing more. He shines like one of the fixed stars in India's literary firmament, but no telescope can discover any appreciable diameter; his name is a *point* of light, but we can detect therein nothing that belongs to our earth or material

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

existence. The details of his life are a blank,* and the very century in which he flourished is an unsettled question in Hindu literary history.

Dr. Hall, in his valuable 'Index to the Bibliography of the Hindu philosophical systems,' (p. 20,) has endeavoured to identify Udayana with Uddyotakara, (whom he places not later than the seventh century,†) but this is untenable, as will be proved, I think, in the sequel.

The first point to settle is the *order* of the series of ancient Nyáya works, 'the sútras of Gotama and Kaṇáda having been explained and annotated by a triple [or rather quadruple] set of commentaries.‡' The order which I venture to propose is as follows,

I.—The original *Sútras* or Aphorisms ascribed to the Ṛishi Gotama or Akshapáda.

II.—The *Nyáya-bháshya,*—a commentary on No. I. by Pakshila Swámin, sometimes called Vátsyáyana.

III.—The *Nyáya-vártika,*—a commentary on No. II. by Uddyotakara Ácharya. I procured lately, from a paṇḍit of Nuddea, a fragment of this work containing a portion of the first book.§

IV.—The *Nyáya-vártika-tátparya-ṭíká*—a commentary on No. III. by Váchaspati Mis'ra.

V.—The *Nyáya vártika-tátparya-paris'uddhi*—a commentary on No. IV. by Udayana Ácharya.

My reasons for this arrangement are the following.

* The only incident I have met with, is the dubious tradition given in the 'Rational Refutation of Hindu philosophical systems,' p. 6, *note*.

† Uddyotakara is mentioned in Subandhu's Vásavadattá, which Dr. Hall has proved to be fully 1200 years old.

‡ Colebrooke.

§ There is an incomplete MS. in the Asiatic Society's Library, which professes to contain the third and fourth adhyáyas (*ity auddyotakaríye nyáyavártake, &c.,*) but it is only Váchaspati Mi'sra's tíká.—The Nuddea fragment contains only the vártika to the first three sútras,—its colophon is

इति श्रीपरमर्षिभारद्वाजश्रीमदुद्द्योतकरन्यायाचार्यप्रणीतन्यायचि-
सूत्रीवार्तिकं सम्पूर्णं ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

In the Calcutta Sanskrit College Library there is a MS. of the *Nyáya-várttika-tátparya-ṭíká,* the opening lines of which I subjoin.

विश्वव्यापी विश्वशक्तिः पिनाकी विश्वेशानो विश्वकृद् विश्वमूर्तिः ।
विश्वज्ञाता विश्वसंहारकारी विश्वाराध्यो राधयत्वीहितं नः ॥ १ ॥
नमामि धर्मविज्ञानवैराग्यैश्वर्यशालिने ।
निधये वाग्विशुद्धीनामक्षपादाय तायिने ॥ २ ॥
ग्रन्थव्याख्याच्छलेनैव निरस्ताखिलदूषणा ।
न्यायवार्तिकतात्पर्यटीकाऽस्माभिर्विधास्यते ॥ ३ ॥
इच्छामः किमपि पुण्यं दुस्तरकुनिबन्धपङ्कमग्नानां ।
उद्योतकरगवीनामतिजरतीनां समुद्धरणात् ॥ ४ ॥

अथ भगवताऽक्षपादेन निःश्रेयसहेतौ शास्त्रे प्रणीते, व्युत्पादिते च भगवता पक्षिलस्वामिना, किमपरमवशिष्यते यदर्थं वार्तिकारम्भ इति शङ्कां निराचिकीर्षुः सूत्रकारोक्तप्रयोजनानुवादपूर्वकं वार्तिकारम्भप्रयोजनं दर्शयति 'यदक्षपादः' इति । यद्यपि भाष्यकृता कृतव्युत्पादनमेतत् तथापि दिङ्नागप्रभृतिभिरर्वाचीनैः कुहेतुसन्तमससमुत्थापनेन आच्छादितं शास्त्रं न तत्त्वनिर्णयाय पर्याप्तमित्युद्योतकरेण स्वनिबन्धोद्योतेन तदपनीयत इति प्रयोजनवानयमारम्भः ।

This passage is evidently a commentary on the work of Uddyotakara Ácharya, whose opening words (*yad Akshapádah,*) the author professes to quote and explain; and he states that the Nyáya 'Sástra was originally delivered by Akshapáda or Gotama and completed by Pakshila Swámin, and that Uddyotakara compiled his Vártika or 'annotations' in order to clear away the erroneous interpretations of Diṇnága and others. The Sanskrit College has also a MS. of the Tátparya paris'uddhi of Udayanácharya, which is undoubtedly a commentary on No. IV. Thus it commences with an invocation to Saraswatí, वाक्चेतसोर्मम तथा भव सावधाना वाचस्पतेर्वचसि न स्खलतो यथैते। and it then proceeds to comment on the first 'Sloka quoted above—विश्वाराध्य इत्यत्र विश्वपदेन &c.

Now if Váchaspati Mi'sra commented on a work of Uddyotakara, and Udayana again on the work of Váchaspati Mi'sra, Uddyotakara and Udayana must be different persons.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

A second question however now arises,—who is the Pakshila Swámin, to illustrate whose work Uddyotakara compiled his Vártika?

The only *Nyáya-bháshya* now known to exist is that which bears the name of Vátsyáyana. By the kindness of Professor Griffith, I have procured a MS. of it from the Benares College Library,* and, on comparing this work with the quotations from Pakshila Swámin's *bháshya* which are frequently given in the fragment of the *Vártika* and in Váchaspati's *Tátparya-ṭíká,* I have discovered that the two works are *the same.* A few extracts will make this evident.

The *Nyáya bháshya* of Vátsyáyana thus commences, प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणम् प्रमाणमन्तरेण नार्थप्रतिपत्तिः। Now the fragment of the *Vártika* commences,

यदक्षपादः प्रवरो मुनीनां शमाय शास्त्रं जगतो जगाद।
कुतार्किताज्ञाननिवृत्तिहेतुः करिष्यते तस्य मया निबन्धः॥

प्रमाणादिपदार्थतत्त्वज्ञानान्निःश्रेयसाधिगम इत्येतच्छास्त्रस्यादिमं सूत्रं। तस्याभिसम्बन्धवाक्यं प्रमाणतोऽर्थप्रतिपत्तावित्येवमादि, तस्यानुसन्धानवाक्यं।

Similarly in the third leaf of the *Tátparya-ṭíká* we read, तदेवं प्रथमसूत्रतात्पर्यमुक्त्वा भाष्यस्यादिवाक्यतात्पर्यमाह 'प्रमाणेतोऽर्थप्रतिपत्तावित्यादि तस्यानुसन्धानं'। तस्य शास्त्रस्य निःश्रेयसाधिगमेन सह सूत्रेण घटितस्य कुतश्चिन्निमित्तात् विघटनाशङ्कायां अनु सूत्रघटनायाः पश्चात् सन्धानं घटनं अनुसन्धानं। तस्य वाक्यमनुसन्धानवाक्यं।

The words of the *vártika,* with their enclosed quotation from the *bháshya,* are thus quoted and explained in the *ṭíká.* After discussing some doubts, it goes on,

सेयमाशङ्का प्रामाण्यज्ञानोपायकथनेनादिवाक्येन भाष्यकृता निराकृता, तथा हि 'प्रमाणमर्थवत्' इति। नित्ययोगेन मतुप्। नित्यता चाव्यभिचारिता, तेनार्थाव्यभिचारीत्यर्थः।......अत्र हेतुः 'प्रवृत्तिसामर्थ्यात्' समर्थप्रवृत्तिजनकत्वात्। प्रवृत्तिजनकत्वं तु प्रमाणस्य न साक्षात् किन्त्वर्थप्रतिपत्तिजननद्वारेणेत्याह 'प्रमाणतोऽर्थप्रतिपत्तौ' इति। सर्वस्य वाक्यस्योपपत्तिं वार्तिकव्याख्यानावसरे निवेदयिष्यामः॥

* It contains 123 leaves, and its colophon is इति वात्स्यायनीये न्यायभाष्ये पञ्चमोऽध्याय।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

The third Adhyáya of Vátsyáyana's *Nyáyabháshya* opens with परीक्षितानि प्रमाणानि प्रमेयमिदानीं परीक्ष्यते तच्चात्मादीत्यात्मा विविच्यते । and similarly the third adhyáya of the *Tátparya ṭíká* commences, अत्र भाष्यं 'परीक्षितानि प्रमाणानि प्रमेयमिदानीं परीक्ष्यते' इति वृत्तानुकीर्तनम् Then again, a few lines after, कस्मात् प्रथमत आत्मैव परीक्ष्यते न प्रमेयान्तरमित्यत आह 'तच्चात्मादीनि' इति । Shortly afterwards it adds तदेतद् वार्तिककारो व्याचष्टे ।*

There can, therefore, be hardly a doubt as to the Nyáyabháshya of Pakshila Swámin and that of Vátsyáyana being the same work.† The latter name seems to imply that the author wrote the book while his father or elder brother (compare Páṇini 4. 1. 105 with 4. 1. 94, 101, 163 and 164,) was alive. Pakshila was his private, Vátsyáyana was his generic, name. Swámin may imply his becoming an *udásína,* or it may have been merely an honorary title. The Pandits similarly have a tradition that a Nyáya-vártika was written by Bháradwája. Dr. Hall mentions in his Catalogue that Uddyotakara belonged to the *gotra* of Bharadwája, and the same thing is stated in the colophon to the Nuddea fragment; and thus the two appellations, Vátsyáyana and Bháradwája, will mutually illustrate each other.

We may thus consider it as proved that Udayana Ácharya is the *fifth,* not the *third,* in the series of Naiyáyika authorities; but are we able to determine anything as to the time in which he flourished? We can hardly hope to fix it with precision, but we are not left wholly to conjecture, as we have, I think, a *terminus à quo* as well as a *terminus ad quem* to limit our chronological uncertainty.

We must here again have recourse to our former expedient of arranging the different authors by their respective quotations,—

* Similarly the lines quoted from Pakshila Swámin in the Sarva D. Sangraha, p. 115, are found in Vátsyáyana, (MS. fol. 4.)

† I hope that the Asiatic Society will publish the Nyáyabháshya in the Bibliotheca Indica, as a second MS. has been just procured from Nuddea. No work could be of greater importance for giving an insight into the older Nyáya.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

the only data which the total absence of literary history in India allows us to use. In this way we can establish a second series of writers, viz. S'ankara Ácharya, Váchaspati Mis'ra, Udayana Ácharya and Mádhava Ácharya; and, as in this series the dates of the first and last are known, we can approximately determine the dates of the intermediate pair. We cannot be far wrong in assigning S'ankara Ácharya to the beginning of the ninth century of our era,* and we know by the testimony of copper land-grants as well as tradition that Mádhava Ácharya and his patron Vírabukka flourished in the earlier half of the fourteenth century.† Now Váchaspati Mis'ra, the fourth in our previous series of Naiyáyika authors, wrote one of the most celebrated glosses (the *Bhámatí*) on S'ankara Ácharya's commentary on the Vedánta Sútras.‡ We have seen that Udayana Ácharya commented in turn on Váchaspati; and his own work, now presented to the reader, is several times quoted by Mádhava in his Sarva Dars'ana Sangraha.§ Now in India a writer must have long ceased to have any visible connection with the present before a Pandit would trouble himself to write commentaries on his works or quote from them as a well-accepted authority; and perhaps therefore we may, without fear of much error, fix Váchaspati Mis'ra in the tenth, and Udayanácharya in the twelfth century. It is something to think that the author of the Kusumánjali may have been an unknown contemporary of Abelard.

The Kusumánjali consists of seventy-two *kárikás* or memorial couplets, divided into five chapters; and as the author's aim was to pack his arguments into the smallest possible compass, the book is of course unintelligible without a commentary. It is not generally known that the author himself compiled such a commentary; and in fact it is not improbable

* Colebrooke's Essays, vol. I. p. 332. Wilson's Sanskrit Dict. preface, 1st ed.
† Wilson's Mackenzie Cat. vol. I. p. cxl. Colebrooke's Essays, vol. I. p. 301.
‡ Both the *Bhámatí* and the *Nyáya-vártika-tátparya-ṭíká* are mentioned in Váchaspati's own list of his works, see Dr. Hall's Catalogue, p. 87.
§ As *e. g.* p. 7, l. 18; p. 113, l. 6; p. 120, l. 13; p. 133, l. 4.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

that the work, as it originally appeared, was in verse and prose,—the latter portion consisting of detached passages of varying length, introduced between the stanzas to supply the necessary links for understanding the argument. There is an imperfect MS. of this description in the Sanskrit Coll. Library. It is called the Kusumánjali, and contains the first chapter in 24 foll.; but it unfortunately ends abruptly at the beginning of the second. It is remarkable that there is no sign of division between the two chapters,—the discussion of the second objection goes on in unbroken continuity with that of the first. As the work is very rare and Dr. Hall does not notice it in his very copious Catalogue, I subjoin a few more details.*

It commences with the first Káriká *(satpratipaksha,)* as the opening invocation; then follows the second *(swargápavarga-yoh.)* Then follows the long prose passage (beginning with *iha yadyapi*, and ending with *abhávāchcheti,*) which is always given as supplying the place of the third káriká. This is followed by the first additional remark.

तत्र न प्रथमः कल्पः, यतः, सापेक्षत्वादित्यादि(here follows s'l. 4.)। न ह्ययं संसारोऽनेकविधदुःखमयो निरपेक्षो भवितुमर्हति, तदा हि स्यादेव, न स्यादेव वा, न तु कदाचित् स्यात्। अकस्मादेव भवतीति चेन्न "हेतुभूतिनिषेधो न स्वानुपाख्यविधिर्न च। स्वभाववर्णना नैवमवधेर्नियतत्वतः"। हेतुनिषेधे भवनस्यानपेक्षत्वेन सर्वदाऽविशेषात्, भवनप्रतिषेधे प्रागिव पश्चादप्यभवनं अविशेषात्। उत्पत्तेः पूर्वं स्वयमसतः स्वोत्पत्तावप्रभुत्वेन स्वस्मादिति पक्षानुपपत्तेः, पौर्वापर्यनियमस्य कार्यकारणभावः, न चैकं पूर्वमपरञ्चेति तत्त्वस्य भेदाधिष्ठानत्वात्। अनुपाख्यस्य हेतुत्वे प्रागपि सत्त्वप्रसक्तौ पुनः सदातनत्वापत्तेः। 'स्यादेतत् नाकस्मादिति कारणनिषेधमात्रं भवननिषेधो वा स्वात्महेतुत्वं वा निरुपाख्यहेतुकत्वं वाऽभिधित्सितं, अपि तु अनपेक्ष एव कश्चिन्नियतदेशवन्नियतकाल इति स्वभाव इति क्रमः'।

* Udayana is not specified as the author of the commentary, but it seems to belong to the same author as the káriḱás, since there is only one *mangalácharaṇa* for both, and the prose and verse follow each other as from the same pen. Unfortunately the MS. is carelessly transcribed and full of blunders. My extract contains many conjectural emendations.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

न, निरवधित्वेऽनियतावधिकत्वे वा कादाचित्कत्वव्याघातात्। न ह्युत्तरकाले संसर्गित्वमात्रं कादाचित्कत्वं किन्तु प्रागसति, सावधित्वे स एव प्राच्यो हेतुरित्युच्यते। अस्तु प्रागभाव एव अवधिरिति चेन्न अन्येषामपि तत्काले सत्त्वात् अन्यथा तस्यैव तत्काले निरूपणानुपपत्तेः। तथा च न तदेकावधिकत्वमविशेषात्। इतरनिरपेक्षस्य प्रागभावस्यावधित्वे प्रागपि तदवधेः कार्यस्य सत्त्वप्रसङ्गात्। 'सन्तु ये केचिदवधयो न तु तेऽपेक्ष्यन्ते इति स्वभावार्थः' इति चेन्न अपेक्ष्यन्त इति कोऽर्थः। किं न नियता आहोस्विन्नियता अप्यनुपकारकाः। प्रथमे धूमो दहनवद्गर्द्दभमप्यवधीकुर्यात् नियामकाभावात् द्वितीये तु किमुपकारान्तरेण नियमस्यैवापेक्षार्थत्वात् तस्यैव च कारणार्थत्वात्, ईदृशस्य च स्वभावस्येष्टत्वात्।

Besides this commentary of the original author's, various pandits have written commentaries to illustrate the work,—for an account of these and the secondary glosses which these have in turn elicited, I refer the reader to Dr. Hall's Catalogue, pp. 82-84.

The Kusumánjali was first printed in Calcutta in the 'Saka year 1769, with the commentary of Haridása Bhaṭṭácharya,—and it was subsequently reprinted in Bengali letters in the Samvat year 1916. For the present edition, two old MSS. have been collated,* which have been long in the possession of Naiyáyika families; and from these I have introduced several emendations into the old text of the commentary.

I have endeavoured to make my translation as accurate as I could, but I cannot fail to have left inadvertencies, for which I must plead in excuse the thorny nature of the subject. I have consulted pandits in all difficulties, but, as their explanations are necessarily given in Sanskrit or Bengali, it is not always easy to detect the frequent subtil distinctions of Hindu metaphysics. The translation is as literal as I could make it so as to be intelligible, and I have every where endeavoured to supplement it by copious notes. But I cannot hope that the general reader

* Lent to me by Paṇḍita Jayanáráyaṇa Tarkapanchánana and Paṇḍita Mahes'achandra Nyáyaratna.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

will be much interested in the major part of the treatise. Hindu philosophers reject all attempt to mix the *dulce* with the *utile*; and, as Dr. Röer has well observed,* "the punishment of this mystery and exclusion is the want of interest felt in the study of their works." I have subjoined a short synopsis of the whole argument, which will shew the ground over which our author professes to travel; and I hope that any one interested in the subject will be able with a little attention to master most of it. The only really abstruse portions are the latter half of the first and third chapters, and the discussion on the meaning of *vidhi* in the fifth; and these will certainly not repay an English reader for the trouble of understanding them.

In my translation I have frequently borrowed Dr. Hall's terminology, as found in his admirable translation of Paṇḍita Nehemiah Nílakaṇṭha 'Sástrí Gore's 'Rational Refutation of the Hindu Philosophical systems,' and I beg to express my continual obligations to the pandit and his translator.

But my acknowledgments are especially due to the Professors of the Sanskrit College, without whose assistance hardly one page of my translation could have been made. I have associated the name of Paṇḍita Mahes'achandra Nyáyaratna with my own on the title page, as I read the original with him; he has also helped me in the collation of the MSS., and his short gloss on the more difficult passages will be of great service to the Sanskrit student. But I must not omit to express my many obligations to Paṇḍita Jayanáráyaṇa Tarkapanchánana and Paṇḍita Táránátha Tarkaváchaspati, the Professors of Philosophy and Grammar,—the two most learned Hindus I have met during my residence in India, and whose names, I hope, will be not wholly unknown in Europe from their respective editions of the Vais'eshika Sútras and the Siddhánta Kaumudí.

E. B. C.

Calcutta, March, 1864.

* Categories of Nyáya Philosophy, Introd. p. v.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

SYNOPSIS OF THE KUSUMA'NJALI.

First Cluster.

The contemplation of God produces liberation ; but the doubt arises,—is there a God for us to contemplate ? the universal practical consent of mankind is conceded, but a fivefold theoretic objection is raised against His existence, i.—iii.

A. There is no such supernatural cause of another world as *adṛishṭa* or desert.

This leads to a discussion on the relation of cause and effect, iv., v., the Mímánsaka notion of a distinct category, called capacity, and the Vedantist and Sánkhya tenet of one common material cause, vi.—xiii. ; the Sánkhya system is discussed, xiv. ; the materialist, xv. ; the Bauddha, xvi., xvii. Objections against causality answered in xviii., xix. Adṛishṭa being unintelligent, its acceptance involves the concession of a Supreme Being to direct it, xix., xx.

Second Cluster.

B. Sacrifices &c. are a sufficient cause of another world, and we need not assume any Supreme Being.

This is met by arguments drawn from the need of an external authority, and the fact of successive creations and destructions of the world, which involve the destruction of the Veda from æon to æon, i.—iv.

Third Cluster.

C. There are arguments to prove God's non-existence, as drawn from the six current proofs *(pramáṇas)*,—

a, from perception *(pratyaksha,)* as He is not perceived.

This is met by a discussion on the nature of non-perception, i.—iii.

β. From inference *(anumána)* iv.—vii.

γ. From comparison *(upamána,)* viii.—xii.

δ. From testimony *(s'abda)* xiii.—xvii.

ε. From presumption *(arthápatti)* xviii., xix.

ζ. From non-perception *(anupalabdhi)* xx.—xxiii.

The two last are denied to be proofs,—the four first are shewn to be silent against Theism.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Fourth Cluster.

D. Some of the Mímánsakas hold that even if God did exist He could not be an authority *(pramáṇa)* to us.

The Mímánsaka definition of *pramá* is shewn to be erroneous, i.—iv., and its true definition given in v., vi.

Fifth Cluster.

E. There is an absence of any positive argument for God's existence.

To meet this, eight separate arguments are given in i. These are discussed, ii.—v.

A new interpretation of i. is then suggested which would give eight vaidic arguments. This is interrupted by a discussion on the true meaning of *vidhi* or 'command,' vi.—xiv. The second interpretation of i. is resumed, xv., xvi. The subject is summed up, xvii.—xix.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कुसुमाञ्जलिः ।

श्रीमदुदयनाचार्यविरचितः ।

श्रीहरिदासभट्टाचार्यकृतव्याख्यानसहितः ।

श्रीमद्धेशचन्द्रन्यायरत्नसङ्कलिततात्पर्यविवरणान्वितः ।

तत्सहितेन तु संस्कृतविद्यालयाध्यक्षेण

श्रीमता इ० बि० काउएलसाहेबेन

संशोधितः ।

कलिकाता-राजधान्यां

व्याप्टिष्ट-मिसन्-यन्त्रे मुद्रितः ।

शकाब्दाः १७८५ ॥ खीष्टाब्दाः १८६४ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कुसुमाञ्जलिः ।

प्रथमः स्तवकः ।

ईषदीषदनधीतविद्यया तातमातृमुदमाविवर्धयन् ।
धीपणाय भवकर्मजन्मनां कोऽपि गोपतनयो नमस्यते ॥

इष्टदेवतासङ्कीर्तनं ब्रह्मप्रतिपादकसच्छब्दप्रयोगात्मकञ्च मङ्गलं कुर्वन् ग्रन्थनामाह

सत्पक्षप्रसरः सतां परिमलप्रोद्बोधबद्धोत्सवो
विम्लानो न विमर्दनेऽमृतरसप्रस्यन्दमाध्वीकभूः ।
ईशस्यैष निवेशितः पदयुगे भृङ्गायमाणं भ्रम-
च्चेतो मे रमयत्वविघ्नमनघन्यायप्रसूनाञ्जलिः ॥ १ ॥

एषोऽनघो निर्दोषः, न्यायः समस्तरूपोपपन्नलिङ्गप्रतिपादकं वाक्यं, स एव कुसुमाञ्जलिः मे मम चित्तं रमयतु दुःखसामग्रीविहीनं करोतु । अनघत्वं शब्ददोषरहितत्वं, विषयाशुद्धेः पूर्वार्धेनैव निरासाभिधानादिति प्रकाशः । अविघ्नं यथा स्यात्, ईशस्य पदयुगे, पद्यतेऽनेनेतिव्युत्पत्त्या पदं प्रत्यायकं, तद्युगं प्रमाणतर्करूपं, तत्र निवेशितः तद्विषयतया उत्पादितः । चेतः कीदृशं, भृङ्गायमाणं भृङ्ग इव मकरन्दे दुःखविगमोपाये सतृष्णं, भ्रमत् दुःखविगमोपायमनुसन्दधत् । प्रसूनाञ्जलिसाम्यमाह

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सदित्यादि। सता समीचीनेन, पक्षेणानुकूलेन रविकिरणादिना प्रसरो विकाशो यस्य स तथा, सतां पक्षाणां दलानां विकाशो यत्र स तथेति वा। सतामनुपहतघ्राणानां परिमलस्य गन्धविशेषस्य प्रोद्बोधेन साक्षात्कारेण बद्ध उत्सव आनन्दो येन सः। विमर्दने करपुटविमर्दने न विम्लानः नान्यथाभूतसंस्थानः। अमृतत्वं रस प्रस्यन्दते इति प्रस्यन्दः, एतादृशं माध्वीकं मधु, तस्य भूरुत्पत्तिस्थानम्॥ न्यायपक्षे, सति प्रामाणिके पक्षतावच्छेदकविशिष्टे इति यावत्, पक्षे सिषाधयिषितसाध्यधर्मके धर्मिणि, प्रसरः प्रकर्षेण सरो ज्ञानं यस्मात्, एतेनाश्रयासिद्धिस्वरूपासिद्धिबाधनिरासः। सतां विवेचकानां, परि सर्वतोभावेन, मलः सम्बन्धो व्याप्तिः, तस्याः प्रोद्बोधेन प्रमया बद्ध उत्सव आनन्दो येन, एतेन व्यभिचारव्याप्यत्वासिद्धिविरोधानां निरासः। विमर्दने विरोधिप्रमाणचिन्तायां न विम्लानः न कार्याक्षमः, तेन सत्प्रतिपक्षराहित्यम्। अमृतं मोक्षः, रस इष्यमाणं 'कृद्विहितः' इति* न्यायात्, प्रस्यन्द उत्पद्यमानं तेन मोक्षस्यासाध्यता निराकृता, तदेव माध्वीकं, तस्य भूरुत्पत्तिस्थानम्॥ १॥

'नन्वीश्वरपदयुगनिवेशितस्य न्यायस्य मोक्षरूपफलसम्बन्धे मानाभावः, तत्त्वज्ञानविषयात्मबोधकस्यात्मशब्दस्य† संसारनिदानमिथ्याज्ञानविषयस्यात्ममात्रपरत्वात् तन्मननस्यैव मोक्षोपायत्वात्' इतिशङ्कायामाह

---

* 'कृद्विहितो भावो द्रव्यवत् प्रकाशते' इति संक्षिप्तसारे।

† "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति बृहदा०।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्वर्गापवर्गयोर्मार्गमामनन्ति मनीषिणः ।
यदुपास्तिमसावत्र परमात्मा निरूप्यते ॥ २ ॥

स्वर्गापवर्गयोः स्वर्गतुल्ययोः अपवर्गयोर्जीवन्मुक्तिपरममुक्त्योः। ईश्वरमननञ्चादृष्टद्वारा स्वात्मसाचात्कारद्वारा वा मुक्तौ हेतुः, "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय"(श्वेता० उ०) इतिश्रुतिस्तत्कारणत्वे मानम्। स्वात्मसाचात्कारस्य मोचहेतुत्वे मानञ्च "यदात्मानं विजानीयादहमस्मीति पूरुषः। किमिच्छन् कस्य कामाय संसारमनुसंसरेत्"(वृहदा०) इति॥२॥

इह यद्यपि यं कमपि पुरुषार्थमर्थयमानाः, शुद्धबुद्धस्वभाव इत्यौपनिषदाः, आदिविद्वान् सिद्ध इति कापिलाः, क्लेशकर्मविपाकाशयैरपरामृष्टो निर्माणकायमधिष्ठाय सम्प्रदायप्रद्योतकोऽनुग्राहकश्चेति पातञ्जलाः, लोकवेदविरुद्धैरपि निर्लेपः स्वतन्त्रश्चेति महापाशुपताः, शिव इति शैवाः, पुरुषोत्तम इति वैष्णवाः, पितामह इति पौराणिकाः, यज्ञपुरुष इति याज्ञिकाः, सर्वज्ञ इति सौगताः, निरावरण इति दिगम्बराः, उपास्यत्वेन देशित इति मीमांसकाः, लोकव्यवहारसिद्ध इति चार्वाकाः, यावदुक्तोपपन्न इति नैयायिकाः, किं बहुना, यं कारवोऽपि विश्वकर्मेत्युपासते, तस्मिन्नेवं जातिगोत्रप्रवरचरणकुलधर्मादिवदासंसारं सुप्रसिद्धानुभवे भगवति भवे तत्त्वसन्देह एव कुतः, किं निरूपणीयं। तथापि, न्यायचर्चेयमीशस्य मननव्यपदेशभाक्। उपासनैव क्रियते श्रवणानन्तरागता। श्रुतो हि भगवान् बहुशः श्रुतिस्मृतीतिहासपुराणादिषु,

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

इदानीं मन्तव्यो भवति "श्रोतव्यो मन्तव्यः" इतिश्रुतेः "आगमेनानुमानेन ध्यानाभ्यासरसेन च। त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तमं" इतिस्मृतेश्च । तदिह सङ्क्षेपतः पञ्चतयी विप्रतिपत्तिः,—अलौकिकस्य परलोकसाधनस्याभावात्, अन्यथापि परलोकसाधनानुष्ठानसम्भवात्,तदभावावेदकप्रमाणसद्भावात्, सत्त्वेऽपि तस्याप्रमाणत्वात्, तत्साधकप्रमाणाभावाच्चेति ॥ ३ ॥

शुद्धो द्वितीयरहितः, बुद्धो बोधस्वरूपः, आदौ सर्गादौ विद्वान् चिद्रूपः, सिद्धः अष्टविधैश्वर्यवान्, अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः, कर्म धर्माधर्महेतुर्यागहिंसादिः, विपाका जात्यायुर्भोगाः, आशया धर्माधर्माः,निर्माणार्थं कायो निर्माणकायः, सम्प्रदायो वेदः, प्रद्योतकः प्रकाशकः, वेदस्य नित्यत्वात्, घटादौ कर्तव्येऽनुग्राहकः शिक्षयिता, शिवो निस्त्रैगुण्यः, पितामहो जनकस्याऽपि जनकः, इज्यते इति यज्ञः, सर्वज्ञः क्षणिकसर्वज्ञः, आवरणमविद्यारागद्वेषमोहाभिनिवेशाः, उपास्यत्वेन देशिता मन्त्रादिः, यावदुक्तेषु यदुपपन्नं तेनोपपन्नः, चरणं शाखा। शाब्दसिद्धावप्यनुमित्सयाऽनुमितेर्न संशयासत्त्वं दोषाय। 'तुष्यतु दुर्जनः' इति न्यायेन संशयमाह तदिहेत्यादि ॥ ३ ॥

धर्माधर्मात्मकालौकिकपरलोकसाधने विप्रतिपन्नं प्रति तत्साधनं, सिद्धे च तस्मिन् तदधिष्ठातृतया ईश्वरसिद्धिः, अचेतनस्य कारणस्य सचेतनाधिष्ठानेनैव कार्यजनकत्वात्। तत्साधनायाह

सापेक्षत्वादनादित्वाद्वैचित्र्याद्विश्ववृत्तितः ।
प्रत्यात्मनियमाद्भुक्तेरस्ति हेतुरलौकिकः ॥ ४ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अलौकिकोऽतीन्द्रियः परलोकहेतुरस्तीति प्रतिज्ञा । तत्र प्रथमतः कारणसामान्यसाधनायाह सापेक्षत्वादिति । सापेक्षत्वं कादाचित्कत्वं, तथा च कार्यं सहेतुकं कादाचित्कत्वात् भोजनजन्यतृप्तिवत् । 'ननु घटादिहेतोः सदातनत्वे घटादेरपि सदातनत्वापत्तिः, तथा च तस्य कादाचित्कत्वं वाच्यम्, एवं तत्कारणपरम्पराऽपि कादाचित्की सहेतुका वाच्या' इत्यनवस्थायामुत्तरमनादित्वादिति, वीजाङ्कुरवत् प्रामाणिकीयमनवस्था न दोषायेत्यर्थः । 'ननु त्रह्मैव कारणमस्तु, किं वा नानाबुद्ध्यात्मिका प्रकृतिरेव तथाऽस्तु' इत्यत्राह वैचित्र्यादिति । कार्यं विचित्रकारणवत् विचित्रकार्यत्वात् । 'ननु दृष्टं यागाद्येव कारणमस्तु किमदृष्टेन' इत्यत्राह विश्ववृत्तित इति । विश्वेषां परलोकार्थिनां वृत्तितः यागादौ प्रवृत्तितः, स्वर्गादिफलकत्वज्ञानमेव यागादिप्रवृत्तिजनकं, यागादेश्च तज्जनकत्वं तत्कालावस्थायिव्यापारं विना न सम्भवतीति अदृष्टसिद्धिः । 'नन्वदृष्टं न भोगसमानाधिकरणं किन्तु भोग्यादिनिष्ठत्वेनैव भोगजनकं' इत्यत्राह प्रत्यात्मनियमादिति । भुक्तेर्भोगस्य प्रतिनियतात्मवृत्तित्वात्, व्यधिकरणादृष्टस्य भोगजनकत्वेऽतिप्रसङ्गात् ॥ ४ ॥

'अकस्मादेव भवति, न किञ्चिदपेक्षं कार्यमिति, अतएव "अनिमित्ततो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शनात्" इति पूर्वपक्षसूत्रं (न्यायसू० ४।२२)' तत्राह

हेतुभूतिनिषेधो न स्वानुपाख्यविधिर्न च ।
स्वभाववर्णना नैवमवधेर्नियतत्वतः ॥ ५ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अकस्मादिति* किं हेतुनिषेधपरं भवननिषेधपरं वा, स्वातिरिक्तहेतुनिषेधपरं पारमार्थिकहेतुनिषेधपरं वा, अन्ते-भयत्राहेतुकत्वमन्त्येऽलीकहेतुकत्वञ्च पर्यवस्यति, स्वभावादि-त्यर्थपरं वा। खं कार्यम्, अनुपाख्यमलीकम्। अवधेर्नियतत्वतः नियतावधिककार्यदर्शनात्, अनियतावधिकत्वे च कादाचित्क-त्वव्याकोप इति भावः॥ ५॥

'नन्वनादिश्चेत् कार्यकारणप्रवाहः कादाचित्कत्वान्यथानु-पपत्त्या कल्प्यः, तदा वह्नित्वावच्छिन्नस्य तृणादिव्यभिचारितया तृणाद्यकारणत्वे कादाचित्कत्वस्वभावव्याकोपः, कारणान्तरस्य च वक्तुमशक्यत्वात्'। अत्र वह्न्यनुकूलैकशक्तिमत्त्वेन कारणता, शक्तिश्च पदार्थान्तरं प्रतिव्यक्ति नाना अनित्येऽनित्या "नित्ये नित्यैव सा शक्तिरनित्ये भावहेतुजा" इति तत्सिद्धान्तात्। 'वह्न्यनुकूला तृणारणिमणिनिष्ठा शक्तिर्नित्या' इति तु मतान्तरम्। न्यायमतं तु तृणादिजन्यतावच्छेदकं वैजात्यमेव, विजातीयेष्वेकजातीय-कार्यानुकूलशक्तिकल्पने धूमादिना वह्न्यनुमानं न स्यात्, न

---

* अकस्मादित्यत्र किंशब्दस्य हेतुपरत्वे तेनैव नञोऽन्वयात् तदभावे कार्यस्य भवनं लभ्यते, यद्यस्यार्थभवनेनान्वये भवननिषेधो लभ्यते। उभयविधश्चैतत् प्रत्येकं नञोऽन्वयेन निष्पद्यत इति प्रत्येकान्वयरूप एकः पक्षः। अथ कस्मादिति समुदितस्य विशिष्टार्थे हेतुप्रयोज्यभवने नञोऽन्वये विशिष्टाभावो लभ्यते। तथा च एकविशेषनिषेधस्य वि-शेषान्तराभ्यनुज्ञाफलकत्वात् पर्युदासनञा वाऽहेतोर्भवनं लभ्यते। अहेतुश्च हेतुभिन्नं कार्यमलीकञ्च सम्भवतीति विशिष्टान्वयपक्षे तदु-भयरूपं पक्षान्तरं निरस्यति स्वानुपाख्य इत्यादिना।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्याच्च तृणफुत्कारसमवधानस्य निर्मन्थनारणिसमवधानस्य प्रतिफलितरविकिरणमणिसमवधानस्य च प्रतिनियमः, कारणतावच्छेदकावच्छिन्नस्यैव कारणतावच्छेदकान्तरावच्छिन्नसमवधाने कार्यजननस्य दृष्टत्वात्, फुत्कारमणिसम्बन्धादितोऽपि वह्न्यापत्तेः । यदि च तृणफुत्कारादिसम्बन्धादिषु वह्न्यनुकूलैका शक्तिः कल्प्यते तदा नैतत् समाधानं, परन्तु तार्णवह्न्यादिनिष्ठं वैजात्यं प्रत्यक्षसिद्धं दीपत्वादिवदिति न पदार्थान्तरशक्तिकल्पनम् । अमुमर्थमाह

प्रवाहो नादिमानेष न विजात्येकशक्तिमान् ।
तत्त्वे यत्नवता भाव्यमन्वयव्यतिरेकयोः ॥ ६ ॥

एष कार्यकारणप्रवाहः नादिमान् अनादिः, विजातीयेषु तृणादिषु एकशक्तिमान् न प्रवाहः, अन्वयव्यतिरेकयोस्तत्त्वे नियतत्वे निर्वाह्ये यत्नवता भाव्यं यत्नः करणीयः, वैजात्यं कल्पनीयमिति भावः । वह्निसामान्यं प्रति तु विजातीयोष्णस्पर्शवत् तेज एव कारणम् ॥ ६ ॥

'ननु यथा एक एव दीपः आलोककारी वर्तिविकारकारी घटादिप्रकाशकारी च, तथा एकमेव ब्रह्म किं वा कार्यकारणयोरभेदात् प्रतिपुरुषं भिन्नभिन्नबुद्धेरभिन्ना प्रकृतिरेव हेतुरस्तु, तथा च नादृष्टाधिष्ठातृतयेश्वरसिद्धिः' इत्यत्राह

एकस्य न क्रमः क्वापि वैचित्र्यञ्च समस्य न ।
शक्तिभेदो न चाभिन्नः स्वभावो दुरतिक्रमः ॥ ७ ॥

एकस्य कारणस्य नियम्यो न कार्याणां क्रमः, समस्य एक-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जातीयकारणस्य प्रयोज्यस्य न कार्याणां वैचित्र्यं वैजात्यं, तथा च क्रमिककार्यनिर्वाहकतया क्रमिककारणसिद्धिः वि-जातीयकार्यजनकतया च विचित्रहेतुसिद्धिरित्यर्थः । 'शक्ति-भेदादेव सजातीयादेकस्मात् कार्यवैजात्यं' इति शङ्कां निरा-कुरुते शक्तिभेदो न चाभिन्न इति । चो हेतौ, न शक्तिभेदः अभिन्नो यतः शक्तिशक्तिमतोरभेदात्, भेदे च तस्यैव कारण-त्वस्वीकारे एकमात्रकारणत्वभङ्गप्रसङ्गो द्वैतापत्तिश्चेत्यर्थः । 'ननु स्वभावादेव एककारणस्य विचित्रकार्यनिर्वाहकत्वं' इत्यत्राह स्वभावो दुरतिक्रम इति । एकस्मिन् कार्ये जनयितव्ये यः स्वभावः, कार्यान्तरजननकाले तस्यानुवृत्तौ दहनस्याऽपि जलादित्वं स्यात्, स्वभावस्य दुरपह्नवत्वादित्यर्थः । प्रदीपस्थले तत्तत्कार्य-सामग्रीभेदकल्पनादिति भावः ॥ ७ ॥

'ननु दण्डादिर्घटादौ हेतुरस्तु, न तु यागादिः स्वर्गादि-हेतुः' इत्यत्राह

विफला विश्ववृत्तिर्नो न दुःखैकफलापि वा ।
दृष्टलाभफला नापि विप्रलम्भोऽपि नेदृशः ॥ ८ ॥

विश्वेषां परलोकार्थिनां स्वर्गाद्यर्थं यागादौ प्रवृत्तिर्वि-फला न, न वा दुःखमात्रफलिका प्रवृत्तेरिष्टसाधनताधीसा-ध्यत्वात्, न च दृष्टलाभफला पूजाख्यातिधनादिफला, तन्निर-पेक्षैरपि तदाचरणात् । 'केनचित् प्रतारकेन स्वर्गादिफलकतया यागादिकं प्रकल्प्य स्वयमनुष्ठाय धन्धितो लोकः प्रवर्तते' इत्य-त्राह विप्रलम्भोऽपि नेदृश इति । क एवं लोकोत्तरो यः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

परप्रतारणार्थं नानाविधक्लेशहेतुकर्मभिरात्मानमवसादयेत्, तथा च यागादिप्रवृत्तिरेव स्वर्गादिफलकत्वे यागादेर्मानमिति ॥ ८ ॥

'ननु यागादिकं स्वर्गादिहेतुरस्तु न तु तज्जन्यादृष्टं तथा' इत्यत्राह

चिरध्वस्तं फलायालं न कर्मातिशयं विना।
सम्भोगो निर्विशेषाणां न भूतैः संस्कृतैरपि ॥ ९ ॥

चिरध्वस्तं यागादिकर्म अतिशयं तत्फलानुकूलव्यापारं विना फलाय नालं न समर्थं, चिरध्वस्तकारणस्य व्यापारद्वारैव हेतुत्वं, यथा अनुभवस्य संस्कारद्वारकस्य स्मृतौ। 'ननु भोग्यनिष्ठमदृष्टं कारणमस्तु' इति जिज्ञासायामाह सम्भोग इति। निर्विशेषाणामदृष्टरूपविशेषगुणशून्यानाम् आत्मनां सम्भोगः प्रत्यात्मनियतो भोगः संस्कृतैरपि अदृष्टवत्तया स्वीकृतैरपि भूतैर्न स्यात्, भूतानां शरीरादीनां सर्वात्मसाधारणात्, तददृष्टाकृष्टैरेव शरीरेन्द्रियादिभिस्तद्भोगजननादित्यर्थः ॥ ९ ॥

'ननु भोग्यादिनिष्ठ एव धर्मविशेषोऽतीन्द्रियः प्रतिनियतभोगादिनियामकोऽस्तु, यथा दाहादिनियामको वह्न्यादिनिष्ठः शक्तिभेदः, अन्यथा तादृशादेव करतलानलसंयोगात् सति प्रतिबन्धके दाहापत्तेः। न च मण्याद्यभाव एव कारणमस्तु इति वाच्यं, कारणत्वस्य भावत्वव्याप्तत्वात्, किन्तु शक्तिनाशं करोतीति मण्यादिः प्रतिबन्धक उच्यते, तथा च शक्तिः स्वीकार्या' इत्यत्राह

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

भावो यथा तथाऽभावः कारणं कार्यवन्मतः ।
प्रतिबन्धो विसामग्री तद्धेतुः प्रतिबन्धकः ॥ १० ॥

यथाऽन्वयव्यतिरेकादिना अभावो ध्वंसः कार्यः तथाऽभावः कारणमपि, 'कारणत्वं भावत्वव्याप्तं' इत्यस्याप्रयोजकत्वात्। 'अकिञ्चित्करस्य प्रतिबन्धकत्वानुपपत्तिः' इत्यत्राह प्रतिबन्ध इति। विसामग्री कारणाभावः, स च प्रकृते मण्याद्यभावस्याभावो मण्यादिः, तत्समवधानहेतुः पुरुष एव प्रतिबन्धकः, स्वार्थे कप्रत्ययेन च मण्यादौ प्रतिबन्धकपदप्रयोग इति भावः। मीमांसकनव्यास्तु "उत्तेजकाभावकूटविशिष्टमण्यभावत्वेन हेतुत्वे गौरवात् लाघवाच्छक्तिर्नित्या वह्न्यादौ कल्प्यते, प्रतिबन्धके सति शक्तिकुण्ठनम्। यत्तु 'शक्तिः प्रथमतो वह्निकारणजन्या वह्निनिष्ठा, प्रतिबन्धकेन च तस्या विनाशे उत्तेजकेन पुनर्जननं। न च शक्तेरनियतहेतुकत्वमिति वाच्यं, शक्त्यनुकूलशक्तिमत्त्वेन कारणत्वात्' इति। तन्न, वह्निनिष्ठनानाशक्तिकल्पनापेक्षया उत्तेजकाभावविशिष्टमण्यभावस्यैकस्यैव वरं हेतुत्वौचित्यात्, तथाचाकुण्ठितशक्तिरेव तत्र कारणतावच्छेदिका कल्प्यते" इत्याहुः। तन्न, शक्तिकुण्ठने प्रतिबन्धकस्य हेतुत्वमुत्तेजकस्य कुण्ठितत्वविनाशकत्वमित्याद्यनन्तशक्तिकल्पनापत्तेरिति दिक् ॥ १० ॥

"ननु 'व्रीहीन् प्रोक्षति, व्रीहीनवहन्ति' इत्यादौ प्रोक्षणजन्यः कालान्तरभाव्यवघातजनको व्यापारो व्रीहिनिष्ठः कल्प्यते, 'प्रोक्षिता एव व्रीहयोऽवघाताय कल्प्यन्ते' इति वाक्यशेषात्। किञ्च यो यद्गतफलार्थितया क्रियते स तन्निष्ठफलजनकव्या-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पारजनकः यागवत्। किञ्च व्रीह्यादीनामापरमाणवन्तभङ्गे व्रीह्यादिनियमानुपपत्तिः। एवं माषकर्षणादिना भूमिनिष्ठा कृषिजन्या शक्तिर्निर्वाच्या"। अत्रोत्तरम्

संस्कारः पुंस एवेष्टः प्रोक्षणाभ्युक्षणादिभिः।
स्वगुणाः परमाणूनां विशेषाः पाकजादयः॥ ११॥

प्रोक्षणादिभिः संस्कारोऽदृष्टं पुंसः पुंसि दृष्टः स्वीकृतः, प्रतिव्रीहि नानाशक्तिकल्पनापेक्षया एकस्यैवादृष्टस्यात्मनिष्ठस्य प्रोक्षणादिजन्यावघातजनकस्य लाघवेन कल्पनात्, दृष्टद्वाराभावे सति विहितस्य कालान्तरभाविफलानुकूलस्य धर्मजनकत्वकल्पनाच्च। संस्कृतो व्रीहिरितिप्रत्ययबलाच्च तस्य स्वरूपसम्बन्धेनैव व्रीहिनिष्ठत्वं कल्प्यते, एतेनाभिमन्त्रितपयःपल्लवादावपि तत्तत्फलानुकूलमदृष्टं पुरुषनिष्ठं। व्रीहीनिति च शत्रून् प्रोक्षति इत्यादाविव प्रोक्षणादिजन्यजलसंयोगादिरूपपरसमवेतक्रियाजन्यफलशालितया कर्मता। 'यो यद्गतफलार्थितया क्रियते स तन्निष्ठफलजनकव्यापारजनकः' इति च शत्रुनिष्ठबधाद्यर्थक्रियमाणश्येनादौ स्वनिष्ठफलजनके व्यभिचारि। यवाद्युत्पत्तिनियमार्थमाह स्वगुणाः परमाणूनां पाकजादयो विशेषा विशेषकाः, तेन पाकजरूपरसादिविशिष्टाः परमाणवस्तत्तत्कार्यमारभन्ते। चिकित्सास्थले तु धातुसाम्यमेव भेषजपानस्य रोगादिनाशे फले जनयितव्ये द्वारमिति भावः* ॥ ११॥

'ननु यत्र पाकजो न विशेषस्तत्र वाय्वादौ कथमुद्भूतस्पर्शादि,

* माषकर्षणादिनापि न शक्तिर्जन्यते किन्तु कर्षणेन पूर्वभूमिनाशे समीकरणानन्तरं विलक्षणा भूमिर्जन्यते। एवमेव पक्षधरमिश्राः।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

करकादौ च प्रतिरुद्धं द्रवत्वमिति, कथञ्च प्रतिमादौ प्रतिष्ठादेरुपयोगः, तथा च प्रतिष्ठाजन्या शक्तिश्चाण्डालादिस्पर्शनाश्या पूज्यताप्रयोजिका स्वीकार्या' इत्यत्राह

निमित्तभेदसंसर्गादुद्भवानुद्भवादयः ।
देवताः सन्निधानेन प्रत्यभिज्ञानतोऽपि वा ॥ १२ ॥

निमित्तभेदः अदृष्टभेदः, देवताः प्रतिष्ठाविधिना सन्निधानेनाहङ्कारममकारादिना आराधनीयतामासादयन्ति, प्रतिष्ठाविधिना देवतानां प्रतिमादौ अहङ्कारममकारौ, चाण्डालादिस्पर्शेन तादृशाभिमानाभावः। देवताचैतन्यविवादेऽपि यथार्थपूजितत्वधीः प्रतिष्ठितत्वधीश्च चाण्डालादिस्पर्शाद्यभावविशिष्टा पूज्यतानियामिका, तत्र चोपयोगिनी प्रतिष्ठा। वस्तुतस्तु प्रतिष्ठाकालीनयावदस्पृश्यस्पर्शनादिसंसर्गाभावः प्रतिष्ठाध्वंसकालीनः पूज्यताप्रयोजकः 'प्रतिष्ठितं प्रपूजयेत्' इति क्तेन प्रतिष्ठाध्वंसस्यैव प्राप्तेरिति दिक् ॥ १२ ॥

'ननु तुलापरीक्षादौ परीक्षाविधिना शक्तिस्तुलादौ जन्यते, तया नमनोन्नमनादिकं फलं जन्यते' इत्यत्राह

जयेतरनिमित्तस्य वृत्तिलाभाय केवलम् ।
परीक्ष्यसमवेतस्य परीक्षाविधयो मताः ॥ १३ ॥

जयस्तदितरः पराजयः, तन्निमित्तस्यादृष्टस्य परीक्षणीयपुरुषसमवेतस्य वृत्तिलाभाय फलानुकूलसहकारिलाभाय परीक्षाविधयो मताः स्वीकृताः। योऽहमनेन परीक्षाविधिना तुलामारूढः सोऽहं पापवान् निष्पापो वेति ज्ञानं सहकारि। यद्वा

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वृत्तिलाभाय जननाय, तथा च प्रतिज्ञानुरूपां शुद्धिमपेक्ष्य धर्मोऽशुद्धिमपेक्ष्याधर्मो जन्यते। एतेन 'ब्रह्मवधाकरणादिना पुण्यस्याजननात् कथं तस्य सहकारि तादृशज्ञानं स्यात्' इत्यपि परास्तम्॥ १३॥

साङ्ख्यास्तु "पुरुषश्चैतन्याश्रयः अकारणं, अत एव कूटस्थो नित्यः। प्रकृतिश्चाचेतना परिणामिनी नित्या एका, प्रकृतेश्च प्रथमपरिणामो बुद्धिर्महत्तत्त्वं, तच्चाष्टौ धर्माः ज्ञानाज्ञानैश्वर्या-नैश्वर्यवैराग्यावैराग्यधर्माधर्मरूपाः, बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्माश्चेत्यष्टौ वा, भावनायास्तैरनङ्गीकारात् अनुभवस्यैव स्मृतिकाले सूक्ष्मतयाऽवस्थानात्। अचेतनायाः प्रकृतिकार्याया बुद्धेश्चैतन्याभिमानान्यथानुपपत्त्या स्वाभाविकचैतन्यस्वरूपः पुरुषः सिद्धः धर्माधर्मिणोरभेदात्। तत्र प्रकृतेर्महान् महतोऽहङ्कारस्तस्माद्रूपरसगन्धस्पर्शशब्दतन्मात्राणीति सप्त, चक्षुस्त्वक्घ्राणरसनाश्रोत्रमनांसि वाक्पाणिपादपायूपस्थानि इन्द्रियाणि, तन्मात्रैः पञ्च महाभूतानि पृथिव्यप्तेजोवाय्वाकाशानि जायन्ते। तदुक्तम् 'मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः' (सा॰का॰३)। पञ्च महाभूतान्येकादशेन्द्रियाणि चेति षोडश। चैतन्यस्य नित्यस्य स्वाभाविकेष्टानिष्टविषयावच्छिन्नस्वाभाव्येऽनिर्मोचः स्यात्, प्रकृत्यधीनत्वेऽपि विषयावच्छेद्यत्वस्य प्रकृतेर्नित्यतया तथैवानिर्मोचप्रसङ्गः, घटादेरनित्यस्यापि स्वाभाविकचैतन्यावच्छिन्नत्वे दृष्टादृष्टविभागानुपपत्तिश्च, इन्द्रियमात्रापेक्षो

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यदि विषयचैतन्यावच्छेदस्तथापि व्यासङ्गानुपपत्तिः, अतो मनः स्वीकार्यं यत्सम्बन्धेन इन्द्रियस्य विषयीयचैतन्यावच्छेदनियामकत्वं। स्वप्नदशायां व्याघ्रत्वाभिमानिनो न नरोऽहमित्यभिमानः, अतस्तन्नियमाय नियतविषयाभिमानव्यापारकोऽहङ्कारोऽपि स्वीकार्यः। जाग्रत्स्वप्नसुषुप्तिषु श्वासप्रश्वासदर्शनात् सव्यापारं यदनुवर्तते तद्बुद्धितत्त्वं प्रागुक्तभावाष्टकयोगि स्वीकार्यं। तस्य ज्ञानरूपपरिणामेन सम्बद्धो विषयः पुरुषस्य स्वरूपतिरोधायकः, एवञ्च बुद्धितत्त्वनाशादेव विषयावच्छेदाभावात् पुंसो मोक्षः। भेदाग्रहाच्च चेतनोऽहं करोमीत्यभिमानः। तदुक्तं 'प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः। अहङ्कारविमूढात्मा कर्ताहमिति मन्यते'(गी०) इति। सा च बुद्धिरंशत्रयवती, पुरुषोपरागः विषयोपरागः व्यापारावेशश्चेति, ममेदं कर्तव्यमित्यत्र ममेति चेतनोपरागः बुद्धिचेतनयोर्भेदाग्रहात् अतात्त्विकः, इदमिति विषयोपरागः, तदुभयायत्तो व्यापारावेशः। बुद्धावारोपितचैतन्यस्य विषयेण सम्बन्धः ज्ञानं, ज्ञानेन सम्बन्धश्चेतनोऽहं करोमीत्युपलब्धिः" इत्याहुः। अत्राह

कर्तृधर्मा नियन्तारश्चेतिता च स एव नः।
अन्यथाऽनपवर्गः स्यादसंसारोऽथ वा ध्रुवः॥ १४ ॥

कृतिसमानाधिकरणास्तावद्धर्माधर्मद्वेषेच्छाः भोगस्य कृतिसामानाधिकरण्यात्, एवं चेतिता चेतनः स एव कृतिमानेव नोऽस्माकं मतः चेतनोऽहं करोमीति प्रत्ययबलात्। दूषणान्तरमाह अन्यथेति। यदि बुद्धिर्नित्या तदा बुद्ध्युपहिता-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

त्मनः सर्वदावस्थानात् अनिर्मोक्षः स्यात्, यद्यनित्या तदोत्पन्ना वाच्या अनित्यभावस्यानुत्पत्त्यभावात्, तथा च तदुत्पत्तेः प्राक् तदाश्रितधर्मादेरप्यभावेन बुद्धितत्त्वस्यानुत्पत्तौ नियतशरीरेन्द्रियादिकार्यस्यानुत्पत्तौ असंसारः स्यादित्यर्थः ॥ १४ ॥

चार्वाकस्तु 'भवतु चेतनधर्मोऽदृष्टं चेतनश्च न नित्यविभुः किन्तु कायाकारपरिणतभूतविशेषः गौरोऽहं जानामीति प्रतीत्या रूपवत्त्वसिद्धेः' इत्यत्राह

नान्यदृष्टं स्मरत्यन्यो नैकं भूतमपक्रमात् ।
वासनासङ्क्रमो नास्ति न च गत्यन्तरं स्थिरे ॥ १५ ॥

शरीरस्य चैतन्ये बाल्यदशायामनुभूतस्य यौवने स्मरणं न स्यात् चैत्रदृष्टस्य मैत्रेणास्मरणमिव। न च बाल्ययौवनयोरेकं भूतं शरीरम्, अपक्रमात् पूर्वशरीरविनाशात् परिमाणभेदेन द्रव्यभेदात् पूर्वपरिमाणनाशस्याऽऽश्रयनाशहेतुकत्वात्। न च कारणेनानुभूतस्य कार्येण स्मरणं स्यादिति वाच्यं वासनासङ्क्रमाभावात्, अन्यथा मात्राऽनुभूतस्य गर्भस्थेन स्मरणापत्तेः। 'ननूपादानवासनाया उपादेये सङ्क्रमः स्यात्' इत्यत्राह न च गत्यन्तरं स्थिर इति। स्थिरे स्थिरपक्षे पुञ्जात् पुञ्जान्तरोत्पत्तेरभावात् करादि शरीरस्योपादानं वाच्यं, तथा च विच्छिन्ने करादौ तदनुभूतस्य स्मरणं न स्यात्, खण्डशरीरे विच्छिन्नकरादेरनुपादानत्वात्। न च परमाणूनां चैतन्यं तेषाञ्च स्थिरत्वात् स्मरणं स्यादिति वाच्यं, तथा सति स्मरणस्यातीन्द्रियत्वप्रसङ्गात् तन्निष्ठरूपादिवत्, करपरमाण्वनुभूतस्य विच्छिन्नकरपरमाण्वसन्निधावस्मरणप्रसङ्गाच्च॥१५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

'नन्वस्तु क्षणभङ्गः तथा च पूर्वपूर्वपरमाणुपुञ्जेनोपादेयोत्तरोत्तरपरमाणुपुञ्ज इति न स्मरणानुपपत्तिः' इत्यत्राह

न वैजात्यं विना तत् स्यात् न तस्मिन्ननुमा भवेत् ।
विना तेन न तत्सिद्धिर्नाध्यक्षं निश्चयं विना ॥ १६ ॥

वैजात्यं कुर्वद्रूपत्वं विना न तत् क्षणिकत्वं स्यात् सिध्यतीत्यर्थः। स्थिर एव बीजादौ सहकारिलाभालाभाभ्यामेव कार्यजन्माजन्मनोरुपपत्तेः बीजत्वादिनैवाङ्कुरादिजनकतोपपत्तेः, बीजव्यक्तिभेदाभावे कुतः क्षणिकत्वं स्यात् । तस्मिन् जातिविशेषे च ऐन्द्रियकवृत्तावतीन्द्रियत्वेनाभ्युपगम्यमाने सत्यनुमानं न स्यात्, धूमकुर्वद्रूपवह्नित्वादिनैव वह्न्यादेर्हेतुतया विलक्षणस्वकार्यजनकत्वेन सम्भावितस्य विजातीयधूमस्यैव वह्निजन्यत्वसम्भावनायां धूमसामान्ये हेतुत्वानिर्णयात्, तथा च कार्यकारणभावरूपविपक्षबाधकतर्काधीनव्याप्तिनिर्णयस्यासम्भवेनानुमानमात्रोच्छेदप्रसङ्ग इति । तेनानुमानेन विना च क्षणिकत्वस्यासिद्धिः,तस्यानुमानैकगम्यत्वात्। न च तत्र प्रत्यक्षमेव मानमिति वाच्यं, निर्विकल्पकस्यैव तन्मते विषयजन्यतया प्रामाण्यं, तस्य च सविकल्पकोन्नेयतया 'क्षणिकः' इति सविकल्पकस्यासिद्धावसिद्धेः। किञ्चाङ्कुरकुर्वद्रूपत्वं न जातिः शालित्वादिना सङ्करात्, शालित्वमपहाय यवे तस्य सत्त्वात्, शालित्वस्यापि कुशूलस्थे शालौ तदपहाय सत्त्वात्, कुर्वद्रूपे शालौ द्वयोः समावेशादिति। अत एव रजतत्वादिव्याप्यं नानैव घटत्वं, *विजातीयसंस्थानवदवयवकत्वरूपमुपाधिमादाय घट इत्यनुगतधीरिति ॥ १६ ॥

(*) विजातीयसंस्थानं कम्बुग्रीवादि ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

'नन्वस्तु क्षणिकत्वे सन्देहः, न च प्रत्यभिज्ञाबलेन स्थैर्यसिद्धौ कथं स इति वाच्यं स एवायं घट इत्यत्र सन्देहसत्त्वात्' अत्राह

स्थैर्यदृष्ट्योर्न सन्देहो न प्रामाण्ये विरोधतः ।
एकतानिर्णयो येन क्षणे तेन स्थिरे मतः ॥ १७ ॥

स्थैर्ये न सन्देहस्तस्य प्रत्यभिज्ञया विषयीकरणात्, न च प्रत्यभिज्ञानरूपे, तस्यापि तदनुव्यवसायेन निर्णयात्, प्रामाण्यमात्रेऽपि न सन्देहः विरोधात् सन्देहज्ञानस्य प्रामाण्यसन्देहे सन्देहस्याप्यसिद्धेः, प्रामाण्यस्यासिद्धौ प्रामाण्यसंशयस्याप्यभावः कोट्यनिर्णयात्। 'ननु प्रत्यभिज्ञायाः प्रामाण्ये संशयः लूनपुनर्जातकेशादौ त एवामी केशा इत्यादेर्भ्रमत्वदर्शनात्' तत्राह एकतेति। येन प्रमाणेन विरुद्धधर्मसंसर्गविरहेण, क्षणिके घटे यदि तस्मिन्नेव क्षणे न नानात्वं किन्त्वभेदः, तदा स्थिरे स्थिरपक्षेऽपि नानाक्षणवर्तित्वेऽपि घटस्य न नानात्वं किन्त्वेकत्वम्, एकस्य ज्ञानस्य नानाविषयसम्बन्धवत् एकस्य नानाकालसम्बन्धेऽपि अविरोधात्, तत्तत्कारणक्रमाधीनत्वात् तत्तत्कालसम्बन्धस्य ॥ १७ ॥

तदेवं परलोकसाधनमागतं। तत्रेदं शङ्क्यते 'कारणत्वं स्वाभाविकमौपाधिकं वा, आद्ये नीलस्य सर्वान् प्रति नीलत्ववत् कारणस्य सर्वान् प्रत्यविशेषात् कारणत्वमपि स्यात्,* द्वितीये उपाधेरपि स्वाभाविकत्वे तद्दोषतादवस्थ्यात्, औपाधिकत्वेऽनवस्था। किञ्च कारणत्वस्य स्वाभाविकत्वे उत्पत्तेरारभ्य कार्यं स्यात्'। तत्राह

*तथा च सर्वं कार्यं सर्वस्य स्यादिति क्वचिदधिकं।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

हेतुशक्तिमनादृत्य नीलाद्यपि न वस्तुसत् ।
तद्युक्तं तत्र तच्छक्तमिति साधारणं न किम् ॥ १८ ॥

हेतुशक्तिं कारणत्वं, अनादृत्य अनिश्चित्य, नीलाद्यपि न वस्तुसत् न प्रामाणिकं, तथा च 'यत् पारमार्थिकं तत् साधारणं यथा नीलादि, कारणत्वञ्च यदि न साधारणम् अतो न परमार्थसत्' इत्यपि न स्यात् दृष्टान्तस्यानित्यस्य नीलस्य कारणत्वस्वीकारेण सर्वत्राभावात् नित्यस्य नीलादेः प्रमाणागोचरत्वात् । किञ्चेत्याद्युक्तं दूषयति तद्युक्तमिति । तद्युक्तं सहकारियुक्तं, तत् कारणं, तत्र कार्ये, शक्तमिति नोत्पत्तेरारभ्य कारणत्वम् । कारणत्वस्य साधारण्ये च इष्टापत्तिमाह इति साधारणं न किमिति । नीलादेरपि सर्वसाधारण्यं यत् सर्वैर्नीलत्वादिना व्यवह्रियमाणत्वं, तादृशञ्च साधारण्यं सहकारियुक्तस्य, जनकत्वमित्यस्याऽपि तथाव्यवहारस्य सर्वसिद्धत्वात् ॥ १८ ॥

'नन्वात्मनिष्ठमदृष्टं नात्मजन्यं, नित्यविभोस्तस्य कालतो देशतश्च व्यतिरेकाभावात् व्यतिरेकसहकृतान्वयस्यैव कारणताग्राहकत्वात्, तद्व्यतिरेकप्रयोजकव्यतिरेकप्रतियोगित्वस्यैव कारणतात्मकत्वाच्च, तथा च समवायिकारणाभावे असमवायिकारणनिमित्ताभ्यामपि न कार्यं जननीयं तत्प्रत्यासन्नाभ्यामेव ताभ्यां जननादित्यदृष्टस्य नित्यत्वापत्तिः, तथा च न प्रतिनियतात्मदेशकालीनभोगजनकत्वं कल्प्येत' इत्यत्राह

पूर्वभावो हि हेतुत्वं मीयते येन केनचित् ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

व्यापकस्यापि नित्यस्य धर्मिधीरन्यथा न हि ॥ १९ ॥

व्यतिरेकगर्भं न कारणत्वं किन्त्वनन्यथासिद्धनियतपूर्वभावः। हि हेतौ, यतो ग्राहको न व्यतिरेकः धर्मिग्राहकमानेनापि तस्य प्रमापणात् इत्यतो मीयते. येन केनचित् व्यापकस्य नित्यस्यात्मनः येन केनचित् प्रमीयते, अन्यथा धर्मिधीरेव न स्यात्, तथा च धर्मिग्राहकप्रमाणसिद्धं तस्य हेतुत्वं, घटादिकं प्रति कपालादेरन्वयव्यतिरेकदर्शनात् समवेतकार्यं प्रति द्रव्यस्य द्रव्यत्वेन कारणत्वस्य कल्पनात् पृथिव्यादिबाधे परिशेषेण ज्ञानेच्छादौ पृथिव्यादिभिन्नसमवायिनः सिद्धिः। वस्तुतस्तु समवायिकारणताघटकोऽन्योन्याभावः, 'यन्न कपालं तन्न घटवदितिवत् यो न आत्मा न तत्र ज्ञानादि' इति धीसम्भवात्। एवं यो न कालस्तत्र सम्बन्धविशेषेण न घट इति निमित्तकारणस्याऽधिकरणीभूतस्य कारणताऽप्यन्योन्याभावरूपव्यतिरेकेण ग्राह्या॥ एवञ्च मायाप्रकृत्यविद्यादिपदमप्येतत्परमिति न 'मायिकं जगत्' इत्यादिश्रुतिविरोधः, तथा चादृष्टाधिष्ठातृतया ईश्वरसिद्धिः॥ १९ ॥

स्तवकार्थसंग्राहकश्लोकमाह

इत्येषा सहकारिशक्तिरसमा माया दुरुन्नीतितो
मूलत्वात् प्रकृतिः प्रबोधभयतोऽविद्येति यस्योदिता ।
देवोऽसौ विरतप्रपञ्चरचनाकल्लोलकोलाहलः
साक्षात् साक्षितया मनस्यभिरतिं बध्नातु शान्तो मम ॥ २० ॥

इति प्रथमः स्तवकः ।

D 2

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

इति स्तवकसमाप्तौ, यस्येशस्य सहकारिशक्तिः सहकारि-रूपा शक्तिः कारणम्, एषा सहकारिरूपा माया, अक्षमत्वं सर्वकार्यापेक्षणीयत्वात्, दुरुन्नेयत्वात् सादृश्यान्मायापदेऽदृष्टे लक्षणा, मूलत्वात् प्रकृतिः सैव, तत्त्वज्ञानप्रतिबध्यत्वात् सैवा-विद्या, उदिता उक्ता, असौ देवो मम मनसि स्वविषयां साक्षादभिरतिं साक्षात्कारि ज्ञानं, बध्नातु जनयतु, साक्षितया साक्षीभूय, निर्णायकतया साक्षित्वं, शान्तः रागादिगुणशून्यः, प्रपञ्चस्य मिथ्याज्ञानादेः कल्लोलः मिथ्याज्ञानपरम्परा, तस्याः कोलाहलः किंवदन्ती सा विरता यस्मादिति ॥ २० ॥

इति श्रीहरिदासभट्टाचार्यविरचितकुसुमाञ्जलिकारिका-प्रथमस्तवकव्याख्यानम् ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कुसुमाञ्जलिः ।

द्वितीयः स्तवकः ।

अन्यथाऽपि परलोकसाधनानुष्ठानसम्भवादिति द्वितीयविप्रतिपत्तिः । 'अन्यथा ईश्वरं विनाऽपि परलोकसाधनयागाद्यनुष्ठानं सम्भवति यागादेः स्वर्गसाधनत्वस्य वेदगम्यत्वात्, नित्यनिर्दोषतया च वेदस्य प्रामाण्यं, महाजनपरिग्रहाच्च प्रामाण्यस्य ग्रह इति वेदकारणतया नेश्वरसिद्धिः, योगर्द्धिसम्पादितसार्वज्ञ्यकपिलादिपूर्वक एव वा वेदोऽस्तु' इत्यत्राह

प्रमायाः परतन्त्रत्वात् सर्गप्रलयसम्भवात् ।
तदन्यस्मिन्ननविश्वासान्न विधान्तरसम्भवः ॥ १ ॥

शाब्दी प्रमा वक्तृयथार्थवाक्यार्थधीरूपगुणजन्या इति गुणाधारतया ईश्वरसिद्धिः । 'ननु सकर्तृकेऽस्तु यथार्थवाक्यार्थधीर्गुणः, अकर्तृके च वेदे निर्दोषत्वमेव प्रामाण्यप्रयोजकमस्तु, महाजनपरिग्रहेण च प्रामाण्यग्रहः' इत्यत आह सर्गप्रलयसम्भवादिति । प्रलयोत्तरं पूर्ववेदनाशादुत्तरवेदस्य कथं प्रामाण्यं महाजनपरिग्रहस्याऽपि तदा अभावात् । शब्दस्यानित्यत्वं उत्पन्नो गकार इति प्रतीतिसिद्धं, प्रवाहाविच्छेदरूपनित्यत्वमपि प्रलयसम्भवात् नास्तीति भावः । 'कपिलादय एव

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सर्गादौ पूर्वसर्गाभ्यस्तयोगजन्यधर्मानुभावात् साक्षात्कृतसकलार्थाः कर्तारः सन्तु' इत्यत आह तदन्यस्मिन्निति । विश्वनिर्माणसमर्था अणिमादिशक्तिसम्पन्ना यदि सर्वज्ञास्तदा लाघवादेक एव तादृशः स्वीक्रियतां स एव भगवानीश्वरः, अनित्यासर्वविषयकज्ञानवति च विश्वास एव नास्तीति वैदिकव्यवहारविलोप इति न विधान्तरसम्भवः ईश्वरानङ्गीकर्तॄनये इति शेषः ॥ १ ॥

'ननु सर्गप्रलयसम्भवादिति न युक्तं प्रलये मानाभावात् इति । अहोरात्रस्याव्यवहिताहोरात्रपूर्वकत्वनियमात्, कर्मणां विषमविपाकतया कालोपाधित्वस्य भोगव्याप्यत्वात् युगपददृष्टस्य च वृत्तिनिरोधानुपपत्तेः, ब्राह्मणस्य ब्राह्मणजन्यत्वनियमात् सर्गाद्युत्पन्नस्य ब्राह्मणत्वाभावात् उत्तरकालेऽपि ब्राह्मणव्यवहारानुपपत्तेः, प्रयोज्यप्रयोजकयोरभावात् सङ्केतग्रहाभावे शब्दव्यवहारानुपपत्तेः, घटादिनिर्माणे नैपुण्यस्य पूर्वदर्शनसापेक्षस्य सर्गादावभावात् घटादिसम्प्रदायोच्छेदादित्यादेर्बाधकाच्च' तत्राह

वर्षादिवद्भवोपाधिर्वृत्तिरोधः सुषुप्तिवत् ।
उद्भिद्वृश्चिकवद्वर्णा मायावत् समयादयः ॥ २ ॥

यथा वर्षादिनस्याव्यवहितवर्षादिनपूर्वकत्वे साध्ये राशिविशेषावच्छिन्नरविकालपूर्वकत्वमुपाधिस्तथाऽहोरात्रस्याव्यवहिताहोरात्रपूर्वकत्वेऽव्यवहितसंसारपूर्वकत्वमुपाधिः, भवोपाधिः संसारावच्छेदककालोपाधिः स एव उपाधिरित्यर्थः । सुषुप्ति-

6269:

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

काले कतिपयव्यक्तिनिष्ठभोगजनकादृष्टनिरोधवत् कालविशेषात् समस्तात्मनां समस्तादृष्टनिरोधस्तदिदमुक्तं वृत्तिरोधः सुषुप्तिवदिति। उद्भित् शाकविशेषः, तस्य यथा तण्डुलकणात् शाकविशेषबीजाच्च उद्भवः, यथा वा वृश्चिकस्य गोमयाद्वृश्चिकाच्च उद्भवस्तथा कालविशेषेऽदृष्टविशेषात् केवलात् इदानीञ्च ब्राह्मणात् ब्राह्मणोत्पत्तिः, वैजात्यस्य कार्यतावच्छेदकत्वात् न व्यभिचारः। यथा मायावी सूत्रसञ्चाराधिष्ठितदारुपुत्रकं कृत्वा दारुपुत्रकं घटमानयेत्यादि नियोज्य घटानयनं सम्पाद्य बालकस्य व्युत्पत्तौ प्रयोजकस्तथेश्वरोऽपि प्रयोज्यप्रयोजकभावापन्नं शरीरद्वयं परिगृह्य व्यवहारं कृत्वा तदानीन्तनानां शक्तिं ग्राहयति। एवं घटादिसम्प्रदायमपि स्वयं कृत्वा शिक्षयति, तदिदमुक्तं मायावत् समयादय इति। समयः शक्तिग्रहः॥ २॥

बाधके निरस्ते साधकमप्याह

जन्मसंस्कारविद्यादेः शक्तेः स्वाध्यायकर्मणोः।
ह्रासदर्शनतो ह्रासः सम्प्रदायस्य मीयताम्॥ ३॥

सम्प्रदायस्य वेदादिसम्प्रदायस्य ह्रासोऽनुमीयतां, कुतः जन्मादेर्ह्रासदर्शनात्। प्रयोगश्च, वेदादिसम्प्रदायोऽयमत्यन्तमुच्छिद्यते ह्रसमानत्वात् प्रदीपवत्। स्वरूपासिद्धुद्धारायाह जन्मेति। पूर्वं मानस्यः प्रजास्ततः पुत्रमात्रार्थिताप्रयुक्तमैथुनजाः सम्प्रति सम्भोगकामिप्रवृत्त्यावर्जितजन्मान इति जन्मह्रासः। पूर्वं चरुप्रभृतिषु संस्कारः ततो गर्भे ततो जननानन्तरम्

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

इदानीं कथञ्चिदिति संस्कारह्रासः। पूर्वं सहस्रशाखस्य चतुर्वेदस्याध्ययनं तत एकस्याः शाखाया इत्यादिक्रमेण विद्याह्रासः। विद्यादेरित्यादिना वृत्तिधर्मादिसंग्रहः, पूर्वमुञ्छशिलवृत्तयस्ततोऽयाचितवृत्तयस्ततः कृष्यादिवृत्तयस्ततः सेवावृत्तय इति वृत्तिह्रासः। पूर्वं तपोज्ञानयज्ञदानात्मकस्य चतुष्पाद्धर्मस्ततस्त्रेतादौ एकैकह्रासः कलौ च विसंष्ठुलः स्खलद्दानैकपादिति धर्मह्रासः। पूर्वं यज्ञशेषभुजस्ततोऽतिथिशेषभुजस्ततः स्वार्थसाधितभुजस्ततो भृत्यादिसहभुज इत्यपि धर्मह्रासः। स्वाध्यायस्याध्ययनस्य कर्मणो यागादेः शक्तेः सामर्थ्यस्य ह्रासात्, अध्ययनशक्तेः कारणस्य ह्रासात् विद्याशक्तेः कार्यस्य ह्रास इति पृथङ्निर्देशः। एवञ्च ब्रह्माण्डनाशे तदन्तर्गतप्राणिनां नाश इति प्रलयसिद्धिः। भक्ष्यपेयाद्यद्वैतरागजीविकाकुतर्काभ्यासव्यग्रताभिसन्धिपाषण्डसंसर्गप्रतारणादिनिबन्धनान्या या प्रवृत्तिर्यागादौ तद्वान् महाजनः, तत्परिग्रहात् वेदप्रामाण्यमिति ॥ ३ ॥

स्तवकार्थसंग्राहकश्लोकमाह

कारं कारमलौकिकाद्भुतमयं मायावशात् संहरन्
हारं हारमपीन्द्रजालमिव यः कुर्वन् जगत् क्रीडति ।
तं देवं निरवग्रहस्फुरदभिध्यानानुभावं भवम्
विश्वासैकभुवं शिवं प्रति नमन् भूयासमन्तेष्वपि ॥ ४ ॥

इति द्वितीयः स्तवकः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कुसुमाञ्जलिः ।

तृतीयः स्तवकः ।

तदभावावेदकप्रमाणसम्भवादिति तृतीयविप्रतिपत्तिः । 'भूतले घटाभाववदीश्वरस्याप्यनुपलब्धेरभावस्य ग्रहात्, परमात्मनोऽयोग्यतया योग्यानुपलब्धेरभावात् नाभावग्रहो यदि तदा शशशृङ्गस्याप्ययोग्यस्य नाभावः सिध्येत्' इत्यत्राह

योग्याऽदृष्टिः कुतोऽयोग्ये प्रतिबन्धिः कुतस्तराम् ।
कायोग्यं बाध्यते शृङ्गं कानुमानमनाश्रयम् ॥ १ ॥

अयोग्ये परमात्मनि योग्यानुपलब्धिः कुतः, सैव बाधिका, या चास्ति सा न बाधिका, अन्यथाऽऽकाशधर्माधर्मादिविलयापत्तेः । शृङ्गन्तु योग्यमेव तथा च कुतः प्रतिबन्धिः । अयोग्यन्तु शशशृङ्गं न बाध्यते किन्तु साधकाभाव एव तत्र । प्रकृते पञ्चमस्तवके साधकस्य वक्तव्यत्वात् । 'ननु कर्तृत्वव्यापकशरीरप्रयोजनाभिसन्धानयोरभावात् ईश्वरस्याभावोऽनुमेयः' इत्यत्राह कानुमानमनाश्रयमिति । ईश्वरस्याश्रयस्य पक्षस्यासिद्धेः, सिद्धौ च धर्मिग्राहकमानेन अनुमानबाध एव ॥ १ ॥

'ननु असत्ख्यात्युपनीत ईश्वरस्तत्र कर्तृत्वाभावः तस्यैव वाऽभावः साध्यः' इत्यत्राह

व्यावर्त्याभाववत्तैव भाविकी हि विशेष्यता ।
अभावविरहात्मत्वं वस्तुनः प्रतियोगिता ॥ २ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

व्यावर्त्यः प्रतिक्षेप्यः, तदभाववत्ता भाविकी पारमार्थिकी हि यतः विशेष्यता अभावस्याश्रयता, तथा चालीकं न विशेष्यमित्यर्थः। अभावविरहात्मत्वं प्रतियोगित्वमवस्तुनो नेति नालीकस्य प्रतिषेधाधिकरणत्ववत् प्रतिषेध्यत्वमपीति भावः॥ २॥

'ननु अयोग्यस्याप्यनुपलब्ध्या कथं नाभावग्रहः' इत्यत आह

दुष्टोपलम्भसामग्री शशशृङ्गादियोग्यता।

न तस्यां नोपलम्भोऽस्ति नास्ति साऽनुपलम्भने॥ ३॥

योग्यानुपलब्धिरेवाभावग्राहिका, अन्यथाऽतीन्द्रियमात्रोच्छेदापत्तेः। योग्यता च प्रतियोगितद्व्याप्येतरयावदुपलम्भसामग्रीसमवधानम्*, एवञ्च शशशृङ्गे योग्यता दुष्टा दोषघटिता उपलम्भसामग्री वाच्या, तस्यां सत्यामनुपलब्धिर्न किन्तूपलब्धिरेव स्यात्, अदृष्टे च सा योग्यता नास्तीति॥ ३॥

'नन्वात्मा किञ्चिदनभिज्ञः स्वनिष्ठकर्तृत्वानिरूपकचितिको वा आत्मत्वात्' इत्यत्राह

---

* प्रतियोगितद्व्याप्याभ्यां इतरा यावती उपलम्भस्य प्रतियोगिप्रत्यक्षस्य सामग्री कारणसमूहस्तस्याः समवधानं मिलनमित्यर्थः। एतादृशयोग्यतासहिता अनुपलब्धिः असद्विषयस्थले कदापि न सम्भवति। तथा हि प्रत्यक्षस्य द्विविधा सामग्री प्रमास्थले विषयसहितः चक्षुरादिकारणकलापः, भ्रमस्थले च विषयरहितः पित्तादिदोषसहितः चक्षुरादिकारणसमुदायः। तत्र प्रथमा विषयसहिता द्वितीया च सर्वदैव विषयरहिता इति फलितं, एतयोरन्यतरसत्त्व एव प्रत्यक्षं जायते। शशशृङ्गस्य असद्रूपत्वेन तत्प्रत्यक्षसामग्री द्वितीया वाच्या, तत्सत्त्वे च शशशृङ्गस्य प्रत्यक्षमेवेति न प्रत्यक्षाभावरूपानुपलब्धिः, तदसत्त्वे च तत्स्वरूपा उक्तयोग्यतैव नास्तीति विसंवादेन शशशृङ्गादिस्थले योग्यतासहिता अनुपलब्धिः न कदापि सम्भवतीति भावः॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

इष्टसिद्धिः प्रसिद्धेऽंशे हेत्वसिद्धिरगोचरे ।
नान्या सामान्यतः सिद्धिर्जातावपि तथैव सा ॥ ४ ॥

प्रसिद्धे संसार्यात्मनि पक्षे इष्टसिद्धिः सिद्धसाधनम्, अगोचरे अज्ञाते ईश्वरे हेत्वसिद्धिः हेतोरज्ञानं, आत्मत्वेन सामान्यतः सिद्धः पक्षश्चेत् तत्राप्यस्मदादिस्तदितर आत्मा वा पक्ष इति विकल्पे सिद्धसाधनं हेत्वसिद्धिर्वा । 'नन्वात्मत्वं जातिः पक्षः' तत्राह जातावपि तथैव सेति । आत्मत्वं जातिर्न क्षितिकर्त्री इत्यत्रेष्टसिद्धिः सिद्धसाधनं, हेतोश्च तत्रासत्त्वमिति हेत्वसिद्धिरित्यर्थः ॥ ४ ॥

'नन्वागमादिसिद्धात्मनि अकर्तृत्वं साध्यं' तत्राह

आगमादेः प्रमाणत्वे बाधनादनिषेधनम् ।
आभासत्वे तु सैव स्यादाश्रयासिद्धिरुद्धता ॥ ५ ॥

आगमादेः प्रमाणत्वे ततएव ईश्वरस्य कर्तृत्वादिसिद्धौ कर्तृत्वाद्यभावसाधने बाधः । आगमादेरप्रमाणत्वे सैवाश्रयासिद्धिः उद्धता उत्कटा ॥ ५ ॥

अत्र चार्वाकाः "योग्यताविशेषणेन किं,'यन्न प्रत्यक्षं तन्नास्ति' इत्यनुपलब्धिमात्रमेव बाधकं स्यात्, अनुमानविलोपश्चेष्ट एव धूमदर्शनानन्तरं वह्न्यर्थप्रवृत्तिश्च सम्भावनामात्रात्" इति तत्राह

दृष्ट्यदृष्ट्योर्न सन्देहो भावाभावविनिश्चयात् ।
अदृष्टिबाधिते हेतौ प्रत्यक्षमपि दुर्लभम् ॥ ६ ॥

सम्भावना हि सन्देहः, स च दृष्टौ नास्ति तस्य निश्चयात्, अदृष्टौ च नास्ति अनुपलब्धौ तदभावस्यैव निर्णयात् । एवम-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दृष्ट्या अनुपलब्ध्या, हेतौ प्रत्यक्षकारणे चक्षुरादौ बाधिते सति प्रत्यक्षमपि प्रमाणं न स्यात्, अनुपलब्धिकालेऽपि तस्य सत्त्वे तु व्यभिचारात् नानुपलब्धिरभावावधारणे हेतुः। एवञ्च गृहा-न्निर्गतश्चार्वाकः पुत्रदाराद्यभावमवधार्य विक्रोशेत्, परावृत्तो ऽपि कुटुम्बं नासादयेत्, तदा तेषां सत्त्वे चानुपलब्धिर्व्यभिचा-रिणी न हेतुः स्यादिति ॥ ६ ॥

'ननु यद्यनुपलम्भमात्रं नाभावसाधकं तदा अयोग्योपाधि-शङ्कया धूमादावपि व्यभिचारशङ्कया न व्याप्तिनिश्चयः स्या-दिति गतमनुमानेन' इत्यत्राह

शङ्का चेदनुमाऽस्त्येव न चेच्छङ्का ततस्तराम्।
व्याघातावधिराशङ्का तर्कः शङ्कावधिर्मतः ॥ ७ ॥

तद्देशतत्कालयोर्व्यभिचाराभावनिश्चयात् कालान्तरदेशा-न्तरस्थयोर्व्यभिचारशङ्का स्यात् कालान्तरदेशान्तरस्थज्ञान-ञ्चानुमानादेवेति सिद्धमनुमानं। शङ्का न चेत्, ततः शङ्का-विरहे तरां सुतरामनुमानम्। 'ननु किं शङ्कानिवर्तकं' तत्राह तर्कः शङ्कावधिर्मत इति। विपक्षबाधकतर्काच्छङ्काविरहो मतः सम्मतः इत्यर्थः। 'ननु तर्कस्यापि व्याप्तिमूलकत्वेऽनवस्था' इत्यत्राह व्याघातेत्यादि। तर्कमूलव्याप्तौ न शङ्का व्याघातात्, क्लृप्तकारणं विना कार्योत्पत्तिशङ्कायां तृप्त्यर्थं भोजनादौ पर-प्रतिपत्त्यर्थञ्च शब्दप्रयोगादौ न प्रवर्त्तेतेति। एवञ्च तर्कानवतारे शङ्कितोपाधिरेवाप्रयोजक इत्युच्यते। तदुक्तं 'यावच्चाव्यति-रेकित्वं शतांशेनापि शङ्क्यते। विपक्षस्य कुतस्तावद्धेतोर्गमनि-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कावत्वम्'। विपक्षस्य विपक्षे हेतोरव्यतिरेकित्वं सत्त्वं यावच्छङ्कयते तावद्धेतोर्न गमकत्वमिति भावः। व्यभिचारशङ्का च उपाधिशङ्काधीना। तदुक्तम् 'अन्ये परप्रयुक्तानां व्याप्तीनामुपजीवकाः। तैर्दृष्टैरपि नैवेष्टा व्यापकांशावधारणा' इति। अन्ये केचन हेतवः परप्रयुक्तानां व्याप्तीनामुपजीवकाः, तथा हि उपाध्यवच्छिन्नहेतुनिष्ठा व्याप्तिः हेतुतावच्छेदकावच्छिन्नहेतुवृत्तितया ज्ञायते, अत एव उप समीपवर्तिनि स्वसमानाधिकरणे स्वधर्मं व्याप्तिं आदधाति बोधयतीति उपाधिशब्दो जवाकुसुमादिसाधारणः, तैः सोपाधिभिर्दृष्टैरपि पक्षे व्यापकांशस्यावधारणा निश्चयो नेष्यते साधारणधर्मेण साध्यसंशयजननादित्यर्थः॥ ७॥

'ननूपमानमीश्वरे बाधकं स्यात्' अत्रोपमानस्यातिरिक्तप्रमाणस्यानभ्युपगमात् न बाधकत्वमिति वैशेषिकादयः। तत्र सादृश्यस्य पदार्थान्तरस्य ग्राहकमुपमानमिति केचित्, सादृश्यं न द्रव्यं गुणः कर्म वा गुणसमवेतत्वात्, न सामान्यं सप्रतियोगिकत्वात्* सामान्यादिवृत्तित्वाच्च, नाभावः सप्रतियोगिकत्वेनाप्रत्ययात्। तच्च न प्रत्यक्षगम्यमिन्द्रियपातमात्रेणाप्रतीतेः, नापि प्रतियोगिज्ञानसहकृतमिन्द्रियं ग्राहकमिति वाच्यं गोसदृशो गवय इति ज्ञानानन्तरं सा गौर्गवयसदृशीत्यसन्निकृष्टगोविशेष्यकग्रहस्याप्रत्यक्षत्वात्, नाप्यनुमानगम्यं लिङ्गाप्रतिसन्धानेऽपि ज्ञायमानत्वात्, न शब्दगम्यं तस्यासार्वत्रिकत्वादिति तत्राह

*(उपमानसापेक्षत्वात्।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

परस्परविरोधे हि न प्रकारान्तरस्थितिः ।
नैकताऽपि विरुद्धानामुक्तिमात्रविरोधतः ॥ ८ ॥

न प्रकारान्तरस्थितिः न नोभयात्मकत्वं*, हि यतः, परस्परविरोधात्, नैकतापि न भावाभावात्मकत्वमपि, विरुद्धानामिति हेतुगर्भविशेषणं परस्परविरोधिरूपत्वात्। विरोधमेव प्रतिपादयति उक्तिमात्रविरोधतः। नाभाव इत्युक्ते च भावत्वप्रतीतेः कथमभावता, न भाव इत्युक्ते चाभावत्वप्रतीतेर्न भावत्वम्। अयमभिप्रायः सादृश्यं भावोऽभावो वा उभयकोव्यतिरिक्तस्याप्रसिद्धेः, अभावत्वे सप्तमपदार्थत्वं भावत्वे च गुणवत्त्वे द्रव्यत्वं निर्गुणत्वे सामान्यवत्त्वे च गुणान्यत्वे कर्मत्वं तदन्यत्वे गुणत्वं निर्गुणनिःसामान्यभावत्वेऽसमवेतत्वे च समवायत्वं समवेतत्वे च अनेकाश्रितत्वे सामान्यत्वं एकाश्रितत्वे विशेषत्वम्। एवं शक्तिसङ्ख्यादयोऽपि पदार्था निराकार्याः ॥ ८॥

'ननु भवतु सादृश्यं समानधर्म एव, तद्ग्राहकमेवोपमानं मानान्तरं स्यात्' इत्यत्राह

साधर्म्यमिव वैधर्म्यं मानमेवं प्रसज्यते ।
अर्थापत्तिरसौ व्यक्तमिति चेत् प्रकृतं न किम् ॥ ९ ॥

अयं गोविसदृश इति ज्ञानानन्तरं सा गौरेतद्विसदृशीति धीः प्रमाणान्तरादेवास्तु। अथ 'एतस्य तद्वैधर्म्यं तस्मिन्नेतद्वैधर्म्यं विनाऽनुपपन्नमित्यर्थापत्तिरेव' इति, गोसादृश्यं गवयस्य गो-

---

* नोभयात्मकत्वं उभाभ्यामन्यत्वमित्यर्थः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गवयसादृश्यं विनाऽनुपपन्नमित्यर्थापत्तिरेवेति न मानान्तरं सादृश्यग्राहकं मन्तव्यमिति ॥ ९ ॥

वैशेषिकादिभिरुपमाने दूषिते नैयायिकः प्राह

सम्बन्धस्य परिच्छेदः संज्ञायाः संज्ञिना सह।
प्रत्यक्षादेरसाध्यत्वादुपमानफलं विदुः ॥ १० ॥

फलमित्यनन्तरं इतीत्यध्याहार्यं, संज्ञाया गवयादिसंज्ञायाः, संज्ञिना गवयत्वादिविशिष्टेन सह, सम्बन्धस्य शक्तेः, परिच्छेदः निश्चयः, उपमानस्य मानान्तरस्य फलमुपमितिः, प्रत्यक्षादेरसाध्यत्वात् इन्द्रियलिङ्गशब्दानामसामर्थ्यात् ॥ १० ॥

"ननु गोसदृशो गवयपदवाच्य इत्यतिदेशवाक्यादेव शक्तिधीरस्तु, 'गवयत्वविशिष्टो धर्मी गवयपदवाच्यो गोसदृशत्वात्' इत्यनुमानाद्वाऽस्तु" तत्राह

सादृश्यस्यानिमित्तत्वान्निमित्तस्याप्रतीतितः।
समयो दुर्ग्रहः पूर्वं शब्देनानुमयापि वा ॥ ११ ॥

समयः गवयत्वादिजातिपुरस्कारेण शक्तिरूपसम्बन्धः, स च दुर्ग्रहः शब्दादनुमानाद्वा न सम्भवति, गवयत्वस्य तेन पुराऽगृहीतत्वात्। न च सादृश्यमेव प्रवृत्तिनिमित्ततया गृह्यतां *तस्य गुरुत्वेणाप्रवृत्तिनिमित्तत्वात् ॥ ११ ॥

'ननु प्रथमतो गवयत्वस्याप्रतीतत्वेऽपि यदा गवयत्वं प्रत्यक्षं

---

* तस्य तद्भिन्नत्वे सति तद्धर्मवत्त्वस्वरूपसादृश्यस्य, अप्रवृत्तिनिमित्तत्वात् शक्यतानवच्छेदकत्वात्, सम्भवति लघौ धर्मे गुरुर्धर्मो नावच्छेदक इति नियमात्।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तदा गोसदृशो गवयपदवाच्य इत्यतिदेशवाक्याल्लक्षणया गवयत्वपरात् तेन रूपेण शक्तिधीरस्तु' तत्राह

श्रुतान्वयादनाकाङ्क्षं न वाक्यं ह्यन्यदिच्छति ।
पदार्थान्वयवैधुर्यात् तदाक्षिप्तेन सङ्गतिः ॥ १२ ॥

गोसादृश्यसामानाधिकरण्येन गवयपदवाच्यत्वविषयकज्ञानजनकतया शब्दस्य गवयत्वादिना शक्तिबोधे नाकाङ्क्षा अन्वयस्य पर्यवसानात्, यत्र पदार्था एवान्वयविधुराः केनापि रूपेणान्वयायोग्याः तत्र तदाक्षिप्तेन तेन लक्षणीयेनार्थेन सङ्गतिरन्वयः यथा गङ्गायां घोष इत्यादौ ॥ 'ननु गवयपदं सप्रवृत्तिनिमित्तकं साधुपदत्वादिति सामान्यतो दृष्टमनुमानमितरप्रवृत्तिनिमित्तकत्वबाधे गवयत्वस्य प्रवृत्तिनिमित्तत्वमवगाहतां' इति चेन्न व्यापकतावच्छेदकरूपेणैवानुमितेर्व्यापकविषयकत्वात् । 'गवयपदं गवयत्वप्रवृत्तिनिमित्तकम् इतराप्रवृत्तिनिमित्तकत्वे सति सप्रवृत्तिनिमित्तकत्वात्' इति व्यतिरेकि च साध्याप्रसिद्ध्या न सम्भवति, व्यतिरेकव्याप्त्यप्रतिसन्धानेऽपि गवयत्वाश्रयो गवयपदवाच्य इति धियोऽनुभवसिद्धत्वाच्च उपमानं प्रमाणान्तरम् । एवं धिक्करभमतिदीर्घग्रीवमतिकठोरकण्टकाशिनमपसदं पशूनामित्यादिवाक्यार्थज्ञानानन्तरं तादृशपिण्डदर्शने करभपदवाच्यताग्रहोऽप्युपमानादेवेति । उपमानं तु शक्तिमात्रपरिच्छेदकतया नेश्वरे बाधकमिति भावः ॥ १२ ॥

'शब्दस्तु नेश्वरे बाधकत्वेन शङ्कनीयः अनुमानानतिरेकात्

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

इति वैशेषिकाः, "पदश्रवणानन्तरं पदार्थस्मरणे 'एते पदार्थाः परस्परं संसर्गवन्तः आकाङ्क्षायोग्यतासत्तिमत्पदस्मारितत्वात् दण्डेन गामभ्याजेतिपदस्मारितपदार्थवत्' (१) इत्यनुमानात् संसर्गसिद्धेः, किं वा 'एतानि पदानि स्मारितपदार्थसंसर्गप्रमापूर्वकाणि आकाङ्क्षादिमत्पदत्वात्' (२) इत्यनुमानात् तत्सिद्धेः, ज्ञानज्ञानस्य तद्विषयविषयकत्वनियमात्*" इति, अत्राह

अनैकान्तः परिच्छेदे† सम्भवे च न निर्णयः।
आकाङ्क्षा सत्तया‡ हेतुर्योग्यासत्तिरबन्धना ॥ १२ ॥

अत्र पदार्थपञ्चकानुमाने (१) संसृष्टा एवेति यदि संसर्गवत्त्वं साध्यते, सम्भावितसंसर्गका इति संसर्गस्वरूपयोग्यत्वं वा, आद्ये पयसा सिञ्चतीत्यादावनैकान्तः§, द्वितीये न संसर्गनिर्णयः, अन्वयप्रयोजकरूपवत्त्वरूपयोग्यताया हेतुविशेषणीकृतत्वेन सिद्धसाधनञ्च‖। द्वितीये प्रयोगे (२) आकाङ्क्षा सत्तया इति। आकाङ्क्षा हि समभिव्याहृतपदस्मारितपदार्थजिज्ञासा, घटमित्युक्ते आनय पश्येति, आनयेत्युक्ते घटं पटं वेति जिज्ञासादयः।

---

* ज्ञानस्य प्रकृते पदार्थसंसर्गप्रमाया यत् ज्ञानं उक्तानुमितिरूपं तस्य, तस्य उक्तसंसर्गप्रमारूपज्ञानस्य यो विषयः संसर्गरूपः स एव विषयो यस्य तत्त्वनियमादित्यर्थः, अयं भावः संसर्गप्रमापूर्वकत्वज्ञानं संसर्गरूपविशेषणगोचरमेवेति न पुनःसंसर्गज्ञानाय प्रमाणान्तरापेक्षा इति।

† परिच्छेदे नियमे।

‡ सत्तया विद्यमानया, न तु ज्ञातया।

§ करकादिस्थिरजलेन सेकासम्भवात्।

‖ अन्वयप्रयोजकरूपं प्रकृते पयस्त्वादि, अयम्भावः हेतुविशेषणतयैव साध्यस्य सिद्धौ पुनः साधनापेक्षैव नास्तीति।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

'ननु योग्यतासहिता आसत्तिरेव हेतुरस्तु', तत्राह योग्यास-त्तिरबन्धना इति व्याप्तिशून्या, अयमेति पुत्रो राज्ञः पुरुषोऽप-सार्यतामित्यत्र निराकाङ्क्षयोराजपदपुरुषपदयोर्व्यभिचारात् ॥ १३ ॥

प्राभाकरास्तु "वेदस्यापौरुषेयतया तत्र वक्तृज्ञानानुमाना-सम्भवात् शब्दः प्रमाणं, लोके तु आप्तोक्तत्वज्ञानमपेक्षितं, तथाच 'अयं वक्ता स्वप्रयुक्तवाक्यार्थयथार्थज्ञानवान् भ्रमाद्य-जन्यवाक्यार्थज्ञानजन्यवाक्यप्रयोक्तृत्वात्' इत्यनुमानाद्वक्तृज्ञानाव-च्छेदकतया,* उत्तरकालं वा 'एते पदार्थाः परस्परं संसृष्टाः वक्तृयथार्थज्ञानविषयत्वात्'इत्यनुमानात् साक्षात् वाक्यार्थसिद्धेः, क्लृप्तसामर्थ्यात् शब्दात् पुनरन्वयधीरित्यनुवादको लौकिकः शब्दो न प्रमाणं" इति[†] प्राहुः, तत्राह

निर्णीतशक्तेर्वाक्याद्धि प्रागेवार्थस्य निर्णये।
व्याप्तिस्मृतिविलम्बेन लिङ्गस्यैवानुवादिता ॥ १४ ॥

वेदेऽवधारितसामर्थ्याच्छब्दाल्लोकस्थलेऽपि प्रागर्थनिर्णये लिङ्गस्यैवानुवादकत्वं, व्याप्तिस्मृतिविलम्बेनानुमानस्य शब्दापेक्ष-या विलम्बितधीजनकत्वात् ॥ १४ ॥

'नन्वाप्तोक्तत्वस्य संशये व्यतिरेके च शाब्दज्ञानानुत्पत्त्या नि-र्णयो हेतुर्वाच्यः, आप्तोक्तत्वञ्च प्रकृतवाक्यार्थगोचरयथार्थधीजन्य-त्वमिति, वाक्यार्थधीः प्रथमतोऽनुमानादेव वाच्या' इति, अत्राह

---

* अवच्छेदकतया विशेषणविधया, अस्य 'सिद्धेः' इत्यनेनान्वयः।

† अगृहीतग्राहित्वं प्रमाणत्वमिति प्राभाकरसिद्धान्तः।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

व्यस्तपुंदूषणाशङ्कैः स्मारितत्वात् पदैरमी।
अन्विता इति निर्णीते वेदस्यापि न तत् कुतः॥ १५॥

आप्तोक्तत्वनिश्चयस्य हेतुत्वे मानाभावः, बाधकप्रमाविरह-रूपयोग्यताज्ञानविलम्बादेवायोग्येऽन्वयधीविलम्बसम्भवात्, अन्यथा वेदेऽपि अपौरुषेयत्वधीर्हेतुरस्तु, तथाच तत्रापि 'अमी वैदिका अर्था 'अन्विताः' परस्परं संसृष्टाः व्यस्तपुंदूषणाशङ्कैः पदैः स्मारितत्वात्' इत्यनुमानात् संसर्गे निर्णीते तत् अनुवादकत्वं वेदस्यापि न कुतः।

यत्तु "पदं न करणं किन्तु पदार्थ एव, अत एव पदार्थकरणकवाक्यार्थज्ञानात् कविकाव्यादिकं,* द्वारमित्यत्र द्वारोपस्थितावपि पदार्थनिष्ठाकाङ्क्षाविरहेणान्वयाबोधः,† 'शाब्दी ह्याकाङ्क्षा शब्देनैव प्रपूर्यते' इति न्यायात्। अतएव 'पदार्थानामवच्छेदकत्वं पदजन्योपस्थितिं विना पदार्थान्वयाबोधात्,‡ तदुक्तम् 'प्राथम्यादभिधातृत्वात् तात्पर्योपगमादपि। पदानामेव सा शक्तिर्वरमभ्युपगम्यताम्'। अभिधातृत्वात् पदा-

---

* तत्र हि पदं विनापि लिपिमात्रदर्शनेन वाक्यार्थबोधोत्तरमभिप्रेतार्थबोधो जायते।

† अत्र पिधेहीतिपदाभावात् नान्वयबोध इति न, किन्तु समभिव्याहृतपदार्थजिज्ञासाभावादेव, श्रुतपदस्यार्थेन समं श्रुतपदार्थान्वय एवाकाङ्क्षोदयनियमादिति भावः।

‡ अयं भावः पदस्य व्यवहितस्यापि अन्वयव्यतिरेकाभ्यां कारणत्वं सिद्धं, पदार्थस्य पदार्थोपस्थितिविशेषणविधया कारणतावच्छेदकत्वमात्रम्।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

र्थोपस्थापकत्वात्' इति गुरुमतमपास्तं, पदानामित्यत्र आप्ता-नामिति प्रक्षेपेणापि आप्तोक्तत्वस्यावच्छेदकत्वापातात्,* तथाचावश्यस्वीकार्यपदार्थोपस्थितौ पदमन्यथासिद्धं न करणम्" इति, तन्न पदार्थानामतीतादिरूपतया अकारणत्वात्, पदार्थस्मरणस्यापि निर्व्यापारतया अकरणत्वात्, पदज्ञानस्यैव करणत्वात्, पदार्थस्मृतेर्व्यापारत्वात्, कविकाव्यादिस्थले च मानसज्ञानं† हेतुरिति ॥ १५ ॥

'ननु शब्दोऽतिरिच्यतां प्रमाणं, स एव बाधकोऽस्तु, तथाहि 'प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः । अहङ्कारविमूढात्मा कर्ताहमिति मन्यते' इति गीतां पठन्ति, प्रकृतेर्बुद्धितत्त्वस्य, गुणैः सत्वादिभिः, क्रियमाणानि कर्माणि मोहादहं कर्तेति चेतनो मन्यते, तेनाभिमानिकं कर्तृत्वं न पारमार्थिकं, न च सर्वज्ञस्याभिमानः विशेषदर्शनात्, कर्तेति तृन्निति न षष्ठी' इति, अत्राह

न प्रमाणमनाप्तोक्तिर्नादृष्टे क्वचिदाप्तता ।
अदृश्यदृष्टौ सर्वज्ञो न च नित्यागमः क्षमः ॥ १६ ॥

अयं हि सर्वकर्तृत्वाभावावेदकः शब्दः अनाप्तोक्तस्तेन्न प्रमाणं, आप्तोक्तश्चेदेतदर्थगोचरज्ञानवतो नित्यसर्वविषयकज्ञानवत्त्वम्

---

* अयं भावः यथा प्राथम्यादितोऽपि नाप्तः कारणं किन्तु आप्तोक्तत्वज्ञानमेव, तथा पदस्य प्राथम्यादित्वेऽपि न कारणत्वमिति ।

† पदस्येतिशेषः, हेतुः शाब्दबोधस्य हेतुः, यदा तत्र न काव्यार्थस्य शाब्दबोधः किन्तु मानसज्ञानमेव, तदेव चमत्कारहेतुरिति ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

इन्द्रियाद्यभावात्, आगमस्य च नित्यत्वं दूषितमेव प्रागिति वेदकारो नित्यः सर्वज्ञः सिद्ध्यति ॥ १६ ॥

'नन्वसत्त्वबोधकागमानां का गतिः', तत्राह

नचासौ क्वचिदेकान्तः सत्त्वस्यापि प्रवेदनात् ।
निरञ्जनावबोधार्थो न च सन्नपि तत्परः* ॥ १७ ॥

असावागमो नासत्त्वमात्रपक्ष एव, सत्त्वस्यापि वक्तृभिः 'मत्तः सर्वं प्रवर्तते' इत्यादिभिः प्रतिपादनात्, द्वयोश्च न मुख्यार्थत्वं विरोधात्, विनिगमकचिन्तायां विशेषगुणशून्यात्मस्वरूपस्य ध्येयत्वतात्पर्यकत्वं बाधकश्रुतीनां, साधकश्रुतीनाञ्च कार्यकारणभावादितर्कमूलकानुमानसाचिव्येन मुख्यार्थकत्वात् ॥ १७ ॥

'ननु यद्यसौ सर्वज्ञः स्यात् अनुपदिश्याऽपि प्रवर्तयेदित्युपदेशानुपपत्तिरेवास्तु ईश्वरे बाधिका, नह्ययमनुपदिश्य स्वयं प्रवर्तयितुं न जानाति सर्वज्ञत्वानुपपत्तेः, अर्थापत्तिश्च मानान्तरं', तत्राह

हेत्वभावे फलाभावात् प्रमाणेऽसति न प्रमा ।
तदभावात् प्रवृत्तिर्न कर्मवादेऽप्ययं विधिः ॥ १८ ॥

प्रमाणेऽसति न प्रमा, प्रमाणरूपहेत्वभावे फलाभावात् प्रमाविरहात्, प्रमाविरहे च न प्रवृत्तिः कारणाभावात्, प्रमाकारणञ्चाग्निष्टोमेनेत्यादिविधिरेव इति नोपदेशव्यर्थता,

---

* निरञ्जनस्य निर्धर्मकस्य आत्मनः । सन्नपि सत्त्वबोधकोऽपि तत्परः असत्त्वतात्पर्यकः ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अन्यथा कर्मवादेऽप्ययं विधिः अदृष्टादेव प्रवृत्तेरुपपत्तेः वेदस्यानर्थक्यापत्तिः । न वाऽर्थापत्तिर्मानान्तरम् ॥ १८ ॥

तदेवाह

अनियम्यस्य नायुक्तिर्नानियन्तोपपादकः ।
न मानयोर्विरोधोऽस्ति प्रसिद्धे वाऽप्यसौ समः ॥ १९ ॥

जीवी देवदत्तो गेहे नास्तीति ज्ञानानन्तरं वहिरस्तीति धीरुदाहरणं, तत्रानियम्यस्याव्याप्यस्य नायुक्तिर्नानुपपत्तिः, अनियन्ता अव्यापको नोपपादकः, व्यापकव्यतिरेकेण व्याप्यस्यैव व्यतिरेकात्, तादृशानुपपत्तिज्ञाने व्यतिरेकव्याप्तिधीरेव।

यदपि 'क्वचिदस्ति गेहे नास्तीतिज्ञानानन्तरं विरोधज्ञानेऽविरोधाय गेहान्यविषयता क्वचिदस्तीत्यस्येत्यर्थापत्तिः' इति, तदपि न, न हि वास्तवो मानयोर्विरोधः, तथा सति एकं मानं भज्येत, विरोधज्ञानस्य तु विषयभेदव्यवस्थापकत्वमनुमानविधयैव, तथाहि विरोधो भिन्नविषयकः एकविषयतायां विरुद्धत्वे सति प्रमाणसिद्धत्वादिति, अन्यथा धूमोऽप्यनुपपद्यमानो वह्निं गमयेदित्यर्थापत्तिरिति प्रसिद्धमप्यनुमानं न स्यात्, अर्वाग्भागावच्छेदेन वह्न्यनुपलम्भः धूमस्य वह्निसाधनमिति विरोधेऽपरभागावच्छेदेन वह्निव्यवस्थापनमप्यर्थापत्तेरेव स्यात्, अनुमानाभावेऽपि च व्याप्तिग्राहकमानस्य वह्निसाधकत्वमर्थापत्तेरित्यनुमानविलोपः स्यादिति ॥ १९ ॥

अनुपलब्धिस्तु नेश्वरे बाधिकेति योग्यादृष्टिरित्यादिनोक्तम्, वस्तुतोऽनुपलब्धिर्मानान्तरमेव नेत्याह

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्रतिपत्तेरपारोक्ष्यादिन्द्रियस्यानुपक्षयात् ।
अज्ञातकरणत्वाच्च भावावेशाच्च चेतसः* ॥ २० ॥

यत्राज्ञातानुपलब्धिः कारणं तत् प्रत्यक्षं, ज्ञातानुपलब्धिजन्याभावज्ञानस्यानुमानत्वात्, जन्यापरोक्षज्ञानस्य इन्द्रियजन्यत्वात्, अपरोक्षत्वञ्च ज्ञानकरणकान्यत्वं, घटादिप्रत्यक्ष इव घटाभावाध्यक्षेऽपीन्द्रियस्यान्यानुपक्षीणत्वात् करणत्वं, अधिकरणप्रत्यक्षाभावेऽपि शब्दादिध्वंसस्य,वायौ रूपाभावस्य च ग्रहात् अधिकरणग्रहेऽप्यनुपक्षयात्, अज्ञातकरणजन्यज्ञानत्वेन इन्द्रियजन्यत्वानुमानाच्च, भावावेशाच्च 'चेतसः' मनसः, अस्मदादिवाह्यानुभवस्य भावभूतकरणसचिवमनोजन्यत्वनियमात् नानुपलब्धिः करणं किन्त्विन्द्रियमेवेति ॥ २० ॥

साधकान्तरमाह

प्रतियोगिनि सामर्थ्याद्व्यापाराव्यवधानतः ।
अत्राश्रयत्वाद्दोषाणामिन्द्रियाणि विकल्पनात् ॥ २१ ॥

इन्द्रियाणि करणमिति साध्यं, प्रतियोगिग्राहकत्वात्, यथाऽनुमानं घटस्येव तदभावस्यापि ग्राहकं तद्वदिन्द्रियमपि। 'ननु प्रतियोगिग्राहकत्वमतन्त्रं, अनन्यथासिद्धत्वस्योपाधित्वात्, आश्रयग्रहेण इन्द्रियस्यान्यथासिद्धेः' इत्यत आह व्यापाराव्यवधानत इति। व्यापारेणाधिकरणप्रत्यक्षेण इन्द्रियस्यान्यथा-

* अयं भावः अभावज्ञानस्य प्रत्यक्षत्वं तत्र च अनुपलब्धेर्हेतुत्वं उभयवादिसिद्धं, विशेषस्त्वयं पूर्वपक्षवादिनयेऽनुपलब्धिरेव करणं नत्विन्द्रियं, सिद्धान्तस्तु प्रत्यक्षसामान्यस्यैव इन्द्रियं करणमतो भावप्रत्यक्षेऽपि तदेव करणमिति ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सिद्ध्यभावात्, अन्यथा संयोगेन चक्षुरादिकमन्यथासिद्धं भावग्रहेऽपि स्यात्। किञ्चाभावभ्रमस्य दुष्टकरणजन्यत्वमवश्यं वाच्यं, दोषश्चेन्द्रियादिनिष्ठ एव, अनुपलब्धेर्दोषवत्त्वाभावात्, पित्तादिना इन्द्रियस्यैव दुष्टत्वात्, तदिदमुक्तम् अनाश्रयत्वाद्दोषाणामिति। अधिकरणाभावयोर्विशिष्टधीर्नेन्द्रियजा अभावधीत्वात्, नानुपलब्धिकरणजा भावधीत्वात् अतो विशिष्टग्राहीन्द्रियं स्वीकार्यं तदिदमुक्तं विकल्पनात् विशिष्टविषयकज्ञानात्* ॥ २१ ॥

'नन्वनुपलब्ध्या घटाभावस्य ज्ञानं ततश्च घटाभाववद्भूतलमिति ज्ञानं, घ्राणजसौरभोपनयानन्तरं सुरभि चन्दनमिति चाक्षुषवत् इत्यभावग्राहिकाऽनुपलब्धिः करणतया वाच्या, निर्विकल्पकविषयीकृत एव इन्द्रियेण सविकल्पकविषयतया गृह्यते तथादर्शनात्। अभावेनेन्द्रियप्रत्यासत्तेरभावात् कथं वा प्रत्यक्षत्वं, विशेषणतायाः सम्बन्धान्तरगर्भत्वात्† अव-

---

* अयं भावः घटाभाववत् भूतलं इति विशिष्टबुद्धिर्न केवलं इन्द्रियमात्रजन्या अभावविषयकत्वात् अपि तु अनुपलब्धिरपि तत्र कारणमस्तु, तथापि तस्याः तत्र करणत्वं न सम्भवति भूतलरूपविशेष्यांशे भावग्राहितया तदंशे इन्द्रियस्य करणताया उभयवादिसिद्धत्वात् इतरांशेऽपि तस्यैव करणत्वमुचितमिति ॥

† उक्तविशिष्टज्ञाने इन्द्रियं करणमस्तु निर्विकल्पकरूपघटाभावज्ञाने तु अनुपलब्धिः करणमिति को दोषः। किञ्च अभावस्य संयोगसमवायादिसम्बन्धाभावेन कथं वा इन्द्रियसम्बद्धत्वं, याऽपि च विशेषणता साऽपि सम्बन्धान्तरसापेक्षतया न सम्बन्धत्वमुपैति, तथाहि विशेषणत्वं नाम केनापि सम्बन्धेन कस्मिंश्चिद्वृत्तित्वं, यथा संयोगसम्बन्धेन भूतले घटस्य वृत्तित्वमिति घटस्य भूतलविशेषणता, नायमभावः केनापि सम्बन्धान्तरेण कुत्रापि वर्त्तते येन तस्य विशेषणता स्यादिति पूर्वपक्षतात्पर्यम् ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्यक्लृप्तकारणताकानुपलब्धेरेव करणत्वं नेन्द्रियस्य' इत्यत्राह

अवच्छेदग्रहध्रौव्यादध्रौव्ये सिद्धसाधनात् ।

प्राप्त्यन्तरेऽनवस्थानान्न चेदन्योऽपि दुर्घटः* ॥ २२ ॥

अवच्छेदग्रहस्य प्रतियोगिग्रहस्य, अभावप्रत्यक्षहेतुत्वात् नियमतः सविकल्पकज्ञानसामग्रीसत्त्वान्न निर्विकल्पकत्वं, घटादिग्रहे तु निर्विकल्पकमेव प्रथमतः, विशिष्टज्ञानहेतुविशेषणज्ञानाभावात्, प्रतियोग्यनुपहितस्याभावस्य भानाभ्युपगमे तु अभावस्यापि निर्विकल्पकविषयतेति सिद्धसाधनम् । सम्बन्धान्तरेऽनवस्थानात् स्वरूपमेवाभावस्याधिकरणेन सम्बन्धः, वैशिष्ट्यस्याभावसम्बन्धस्याङ्गीकृतस्यापि सम्बन्धधारायामनवस्थानात् स्वरूपसम्बन्धस्वीकारस्यावश्यम्भावात्, इन्द्रियसम्बद्धविशेषणताया घटाभावादिप्रत्यक्षे सन्निकर्षतया कल्पनात् । न चेदेवं, तदाऽनुपलब्धिकरणतापक्षेऽपि अन्यप्रकारो दुर्घटः,

---

* सिद्धान्तस्त्वयं, यन्मतेऽभावप्रत्यक्षं प्रति प्रतियोगिज्ञानं कारणं, तन्मते अभावस्य निर्विकल्पकमेव नास्ति, प्रतियोगिज्ञानादेव नियमतो प्रतियोगिविशिष्टाभावज्ञानस्योदयात्, यन्मते प्रतियोगिज्ञानं न तत्र कारणं, तन्मतेऽभावस्य निर्विकल्पकसत्त्वेऽपि इन्द्रियादेव तदुत्पत्तिः सम्भवति । नापि विशेषणतायाः उक्तरूपेण सम्बन्धान्तरगर्भता, तस्याः स्वरूपसम्बन्धरूपत्वात्, स्वरूपसम्बन्धश्च नातिरिक्तः किन्तु अभावस्य अधिकरणस्य वा स्वरूपमेव, अतिरिक्तत्वे यथा संयोगस्य समवायः सम्बन्धान्तरं तथा स्वरूपसम्बन्धस्यापि सम्बन्धान्तरं एवं तस्य तस्यापीति अनवस्था स्यात्, इन्द्रियसम्बद्धेऽभावस्य तादृशस्वरूपसम्बन्धरूपविशेषणतैव सन्निकर्षः, उक्तसम्बन्धाभावे भूतले घटाभावसम्बन्धावगाहिन्याः घटाभाववद्भूतलमितिप्रतीतेः वायूरूपवान् इत्यादिवत् भ्रमत्वमापद्येतेति ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तथा हि सर्वैरेव प्रमाणैः परम्परया निर्विकल्पकविषय एव गृह्यते, अनुमानादावपि वह्न्यादेः पूर्वं कदाचिन्निर्विकल्पकस्वीकारात्, घटाभाववद्भूतलमित्यादिविशिष्टप्रत्ययबलात् अभावेनाधिकरणस्य प्राप्तेर्भवताऽपि स्वीकारात्॥ २२॥

स्तवकार्थसंग्राहकश्लोकमाह

प्रत्यक्षादिभिरेभिरेवमधरो दूरे विरोधोदयः
प्रायो यन्मुखवीक्षणैकविधुरैरात्माऽपि नाऽऽसाद्यते।
तं सर्वानुविधेयमेकमसमस्वच्छन्दलीलोत्सवम्
देवानामपि देवमुद्भवदतिश्रद्धाः प्रपद्यामहे॥ २३॥

इति तृतीयः स्तवकः।

यस्येश्वरस्य मुखनिरीक्षणैकविधुरैर्धर्मिग्राहकमानबाधितैः* प्रत्यक्षादिभिरात्मैव नासाद्यते, विरोधोदयो यतोऽधरोऽधः, अत एव दूरे, सर्वमनुविधेयं वश्यं यस्येति, असमा स्वच्छन्दा चेतनान्तराप्रयोज्या या लीला सैवोत्सवो यस्य स तथा, दुःखाभावैकनिदानत्वात्, अतएव उद्भवदतिश्रद्धाः, देवानामपि देवं स्तुत्यं, प्रपद्यामहे॥ २३॥

॥ इति तृतीयस्तवकव्याख्यानम्॥

---

* ईश्वरो नास्तीत्यादिरीत्या ईश्वरधर्मिकासत्त्वसाधकतया उपन्यस्तानि प्रत्यक्षादीनि प्रमाणानि स्वधर्मीभूतेश्वरसाधकप्रमाणेन बाध्यमानानि प्रमाणतामेव नासादयन्तीति भावः।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कुसुमाञ्जलिः ।

चतुर्थः स्तवकः ।

सत्त्वेऽपि तस्याप्रमाणत्वादिति तुरीयविप्रतिपत्तिः । 'ईश्वरो न प्रमाणं तज्ज्ञानस्यागृहीतग्राहित्वाभावेन प्रमात्वाभावात्, ईश्वरस्य प्रमाकर्तृत्वं प्रमाकरणत्वञ्च नास्तीति अप्रमाणपुरुषस्य वचः कः श्रद्दध्यात्' इत्यत्राह

अप्राप्तेरधिकप्राप्तेरलक्षणमपूर्वदृक् ।
यथार्थोऽनुभवो मानमनपेक्षतयेष्यते ॥ १ ॥

अपूर्वदृक्त्वं अगृहीतग्राहित्वं न प्रमालक्षणं धारावहनबुद्ध्यव्याप्तेः इदं रजतमितिभ्रमातिव्याप्तेश्च । स्वमते लक्षणमाह यथार्थ इति । अनपेक्षतयेति स्मृतेः जनकानुभवसमानविषयकतया तत्प्रामाण्याधीनप्रामाण्यकतया सापेक्षत्वात् तत्र न प्रमाव्यवहारस्तान्त्रिकाणामिति ॥ १ ॥

'ननु धारावाहिके नाव्याप्तिः, ज्ञानेन हि विषयनिष्ठो धर्मः कश्चिज्जननीयः, अन्यथा ज्ञानस्य विषयं प्रति नियमो न स्यात्*,

---

* अयं भावः घटज्ञानस्य घट एव विषयः न तु पटः इति नियमो हि तदैव उपपद्यते यदि घटज्ञानेन घटे कश्चित् विशेषः स्यात्, अन्यथा घटपटोभयं प्रत्येव ज्ञानस्य औदासीन्येन घट एव विषय इति नियमानुपपत्तिः, स च विशेषः ज्ञाततानामकः, तादृशो विशेषस्तु येन ज्ञानेन यस्मिन् जायते तस्य स एव विषयः नान्य इति मीमांसकसिद्धान्त इति ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तथा च तमादायागृहीतग्राहित्वमेव*। किञ्च स धर्मस्तदुपादानज्ञानजन्यो न वा, आद्ये उपादानज्ञानस्य उपादानविषयतानियमार्थं धर्मान्तरस्वीकारे तत्राप्येवमित्यनवस्था, द्वितीये कार्यत्वं हेतुः तत्रैव† उपादानज्ञानजन्यत्वव्यभिचारीति नेश्वरस्य क्षित्यादिकर्तृतया सिद्धिः' इत्यत्राह

स्वभावनियमाभावादुपकारो हि दुर्घटः।
सुघटत्वेऽपि सत्यर्थेऽसति का गतिरन्यथा ॥ २ ॥

स्वभावविशेष एव विषयतानियामकः, अन्यथा ज्ञाततधानेऽपि नियमानुपपत्तिः इति स्वभाव एव नियामकस्तत्रेति। किञ्च वर्तमानविषये तदुत्पत्तावपि अविद्यमाने विषये ज्ञाततया उपादानविरहात् अनुत्पत्तौ विषयतानियमानुपपत्तिरिति स्वभाव एव तत्र नियामक इति ॥ २ ॥

'ननु क्रियया कर्मणि किञ्चिज्जननीयमितिव्याप्तेर्ज्ञानक्रियायाऽपि विषयनिष्ठो धर्मो जननीयः' इत्यत्राह

अनैकान्तादसिद्धेर्वा न च लिङ्गमिह क्रिया।
तद्वैशिष्ट्यप्रकाशत्वान्नाध्यक्षानुभवोऽधिके‡ ॥ ३ ॥

---

* पूर्वागृहीतां प्रथमज्ञानजन्यज्ञाततामादाय द्वितीयज्ञानस्य, द्वितीयज्ञानादिजन्यज्ञाततादिकमादाय तृतीयादेरगृहीतग्राहित्वमिति भावः।

† तत्रैव ज्ञाततानामकधर्म एव, तस्य जन्यत्वेन कार्यत्वात्।

‡ तस्य ज्ञानस्य वैशिष्ट्यं सम्बन्धः, तत्प्रकाशत्वात् तद्विषयकत्वात् अधिके ज्ञातताख्यधर्मे न अध्यक्षानुभवः न प्रत्यक्षं प्रमाणमित्यर्थः।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

क्रिया यदि धात्वर्थस्तदा 'शरेण गगनं युनक्ति' इत्यत्र संयोगेन गगननिष्ठकिञ्चिदजननात् अनैकान्तः, यदि करण-व्यापारः क्रिया तदापीन्द्रियसंयोगादिना घटादिनिष्ठकिञ्चि-दजननात् व्यभिचारः, अथ क्रिया स्पन्दस्तदा ज्ञानस्य स्पन्दा-नात्मकत्वादसिद्धिः। 'ननु ज्ञातो घटः साक्षात्कृतो घट इत्यादि प्रत्यक्षमेव ज्ञाततायां मानं' इत्यत्राह तद्वैशिष्ट्येति। सर्वत्र विशिष्टज्ञाने विशेषणविशेष्ये तदुभयसम्बन्धो विषयः, स च सम्बन्धः क्वचित् संयोगादिः क्वचित्तु स्वरूपं, तदिह 'घट-ज्ञानं' इत्यत्रेव घटज्ञानयोः स्वरूप एव सम्बन्धः 'ज्ञातो घटः' इत्यत्रापि भासते, अन्यथा 'दृष्टो घटः' 'कृतो घटः' इत्यत्र दृष्टताकृततयोरप्यापत्तेः॥ ३॥

स्वभावसम्बन्धादुपपत्तिस्तुल्या तदुच्यते

अर्थेनैव विशेषो हि निराकारतया धियाम्।
क्रिययैव विशेषो हि व्यवहारेषु कर्मणाम्॥ ४॥

यथा घटादिना ज्ञाने विशिष्टधीः यथा च क्रिययैव कर्मणां घटादीनां व्यवहारेषु विशिष्टबुद्ध्यादिषु विशेषस्तथा ज्ञातो घट इत्यादौ ज्ञानेनैव घटादौ विशिष्टधीर्न धर्मान्त-रादिति* ॥ ४ ॥

---

* घटादिना विशेषणेन, ज्ञाने विशिष्टधीर्घटज्ञानमिति बुद्धिः, क्रिययैव विशेषणीभूतकृत्या एव, अस्यास्च विशेष इत्यनेनान्वयः। विशिष्टबुद्ध्यादिषु 'कृतो घटः' इति प्रतीत्यादिषु, ज्ञानेनैवेति विशे-षणेनेति शेषः, धर्मान्तरात् ज्ञाततारूपादित्यर्थः।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

'ननु तथापि नेश्वरज्ञानं प्रमा प्रमाणजन्यत्वाभावात्, एवमीश्वरो न प्रमाता न वा प्रमाणं प्रमाकर्तृत्वकरणत्वयोरभावात्' अत्राह

मितिः सम्यक्परिच्छित्तिस्तद्वत्ता च प्रमातृता ।
तदयोगव्यवच्छेदः प्रामाण्यं गौतमे मते ॥ ५ ॥

यथार्थानुभवत्वमेव प्रमात्वमजन्यत्वेऽपीश्वरज्ञानस्याविरुद्धं, प्रमातृत्वं प्रमासमवायित्वं तच्च अकारणत्वेऽपि प्रमाया ईश्वरस्याविरुद्धम्। एवं प्रमया सहायोगव्यवच्छेदेन सम्बन्धितयेश्वरस्य प्रमाणत्वमपि न तु करणत्वमपि तत्र नियामकमिति, 'मन्त्रायुर्वेदवत् तत्प्रामाण्यमाप्तप्रामाण्यात्' इति सूत्रे (न्यायसू० २।६८) ईश्वरस्य प्रामाण्यमुक्तं। न चेश्वरस्य पञ्चमप्रमाणत्वापत्त्या विभागव्याघातः प्रमाकरणाभिप्रायेण विभागसम्भवात्। न चेश्वरज्ञानस्य भ्रमविषयकत्वे भ्रमविषयावगाहित्वेन भ्रमत्वापत्तिरिति वाच्यं व्यधिकरणप्रकारकत्वाभावेनाप्रमात्वाभावात्, भ्रमनिष्ठं शुक्तिविशेष्यकत्वं रजतत्वप्रकारकत्वञ्च सदेव तदवगाहितया ईश्वरज्ञानस्य प्रमात्वाद्यतेः ॥ ५ ॥

स्तवकार्थसंग्राहकश्लोकमाह

साक्षात्कारिणि नित्ययोगिनि परद्वारानपेक्षस्थितौ
भूतार्थानुभवे निविष्टनिखिलप्रस्ताविवस्तुक्रमः ।
लेशादृष्टिनिमित्तदुष्टिविगमप्रभ्रष्टशङ्कातुषः
शङ्कोन्मेषकलङ्किभिः किमपरैस्तन्मे प्रमाणं शिवः ॥ ६ ॥

इति चतुर्थः स्तवकः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

भूतार्थानुभवे यथार्थानुभवे, साक्षात्कारिणि प्रत्यक्षे, निविष्टो विषयीभूतो निखिलप्रस्ताविवस्तूनां नानापदार्थानां क्रमो यस्य स तथा अनुभवविषयसकलविश्वक इत्यर्थः, नित्ययोगिनि सदातनयुक्ते, अतएवेन्द्रियाणां द्वाराणामनपेक्षा स्थितिर्यस्य, लेशतोऽप्यंशतोऽपि अदृष्टिर्विशेषादर्शनं तन्निमित्तिका या दुष्टिः रागद्वेषमोहात्मिका तद्विगमेन प्रभ्रष्टः शङ्कातुषः वेदाप्रामाण्यशङ्कालेशो यस्मादित्यर्थः, प्रमाणं शिवः, एवम्भूते तत्राप्रामाण्यशङ्कारूपकलङ्कवद्भिः पाषण्डैः किं कर्तव्यमिति भावः* ॥ ६ ॥

इति चतुर्थस्तवकव्याख्यानम् ।

'एवम्भूते' इत्यादिपाठः प्राचीनपुस्तकद्वये नास्ति ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कुसुमाञ्जलिः ।

पञ्चमः स्तवकः ।

'तत्साधकप्रमाणाभावात्' इति पञ्चमविप्रतिपत्तिः 'नन्वीश्वरे साधकप्रमाणमेव नास्ति' इत्यत्राह

कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः ।
वाक्यात् सङ्ख्याविशेषाच्च साध्यो विश्वविदव्ययः ॥ १ ॥

क्षित्यादि सकर्तृकं कार्यत्वात् घटवत् सकर्तृकत्वञ्च उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वम्। आयोजनं कर्म एवञ्च सर्गाद्यकालीनद्व्यणुकारम्भकपरमाणुद्वयसंयोगजनकं कर्म चेतनप्रयत्नपूर्वकं कर्मत्वात् अस्मदादिशरीरक्रियावत्। धृतीति ब्रह्माण्डादि पतनप्रतिबन्धकीभूतप्रयत्नवदधिष्ठितं धृतिमत्त्वात् वियति विहङ्गमधृतकाष्ठवत् धृतिश्च गुरुत्ववतां पतनाभावः। धृत्यादेरित्यादिपदात् नाशपरिग्रहः, ब्रह्माण्डादि प्रयत्नवद्विनाश्यं विनाशित्वात् पाट्यमानपटवत्। पदात् पद्यतेऽनेनेति व्युत्पत्त्या पदं व्यवहारः, पटादिसम्प्रदायव्यवहारः स्वतन्त्रपुरुषप्रयोज्यः व्यवहारत्वात् आधुनिकलिप्यादिव्यवहारवत्। प्रत्ययतः प्रामाण्यात्, वेदजन्यज्ञानं कारणगुणजन्यं प्रमात्वात् प्रत्यक्षादिप्रमावत्। श्रुतेर्वेदात्, वेदः पौरुषेयो वेदत्वात् आयुर्वेदवत्। किञ्च वेदः पौरुषेयो वाक्यत्वात् भारतवत्, वेद-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वाक्यानि पौरुषेयाणि वाक्यत्वात् अस्मदादिवाक्यवत् । 'सङ्ख्याविशेषात्', द्व्यणुकपरिमाणं सङ्ख्याजन्यं परिमाणप्रचयाजन्यत्वे सति जन्यपरिमाणत्वात् तुल्यपरिमाणककपालद्वयारब्धघटपरिमाणात् प्रकृष्टतादृशकपालत्रयारब्धघटपरिमाणवत्*, अणुपरिमाणञ्च न परिमाणजनकं, नित्यपरिमाणत्वात् अणुपरिमाणत्वाद्वा, एवञ्च सर्गादौ द्व्यणुकपरिमाणहेतुपरमाणुनिष्ठद्वित्वसङ्ख्या च नास्मदाद्यपेक्षाबुद्धिजा, अतस्तदानीन्तनापेक्षाबुद्धिरीश्वरस्यैवेति । विश्वविद्व्यय इति विशिष्टस्याव्ययत्वं, तेन नित्यसर्वविषयकज्ञानसिद्धिः† ॥ १ ॥

'ननु शरीरविशिष्टस्य कर्तृतया विशेषणबाधात्मको विशिष्टबाध इति (१), कर्तृजन्यत्वव्यापकशरीरजन्यत्वाभावात् कर्तृजन्यत्वाभाव इति सत्प्रतिपक्षता च (२), यद्वा 'कर्ता शरीर्येव' इति व्याप्तिर्विरोधिनी (३), यद्वा व्याप्त्या यथादर्शनप्रवृत्तया शरीरी कर्ता उपनेयः, पक्षधर्मतया च क्षित्यादावशरीरीति विशिष्टसाध्याप्रसिद्धिः विशेषणविशेष्यविरोधस्य (४), यद्वा शरी-

---

* यादृशपरिमाणयुक्तेन कपालद्वयेन एको घटो जन्यते, तादृशपरिमाणयुक्तेनैव कपालत्रयेण द्वितीयोऽपि घटो जातः, परन्तु पूर्वघटपरिमाणापेक्षया द्वितीयस्य उत्कृष्टपरिमाणवत्त्वं प्रत्यक्षसिद्धमिति, तत्र कारणचिन्तायां प्रथमस्य कपालद्वयजातत्वात् द्वितीयस्य तत्त्रयजातत्वाच्च परिमाणवैलक्षण्यमित्यङ्गीकार्यं, तथा च द्वितीयघटपरिमाणं कपालगतत्रित्वसङ्ख्याजन्यमिति प्रकृतदृष्टान्तता ।

† विशिष्टस्य विश्वज्ञानवतः, अव्ययत्वं नित्यत्वं, साध्यते इति शेषः, तेनेति विशिष्टान्वयस्थले विधेयस्य विशेषणविशेष्योभयान्वितत्वनियमादिति हृदयम् ।

H

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

रजन्यत्वाद्युपाधिना व्याप्यत्वासिद्धिः (५), इति कार्यत्वहेतौ पञ्च दोषाः'*, तत्राह

न बाधोऽस्योपजीव्यत्वात्, प्रतिबन्धो न दुर्बलैः ।
सिद्ध्यसिद्ध्योर्विरोधो न, नासिद्धिरनिबन्धना ॥ २ ॥

ईश्वरे धर्मिणि शरीरबाधात् कर्तृत्वबाधो (१) न, अधिकरणज्ञानं विना अभावज्ञानासम्भवात् अस्य कार्यत्वस्य धर्मिसाधकस्य† अधिकरणज्ञानजनकतया अवश्यापेक्षणीयत्वेन बलवत्त्वात्, एवञ्च न विशेषणबाधात्मको विशिष्टबाधः प्रत्यक्षात्मक इति, ईश्वरो न कर्ता अशरीरत्वात् इत्यनुमानबाधोऽपि नेत्यर्थः । क्षित्यादि न सकर्तृकं शरीराजन्यत्वात् इति (२) न प्रतिबन्धकं, सत्प्रतिपक्षहेतोः शरीरांशवैयर्थ्यात् व्याप्यत्वासिद्ध्या‡ दुर्बलत्वात् । तृतीयेऽपि कार्यत्वव्याप्तेः पक्षधर्मत्वसहकारात् विपक्षबाधकतर्कावताराच्च§ बलवत्त्वम्, उपन्यस्तायाः 'कर्ता शरीर्येव' इति व्याप्तेर्दुर्बलतया न प्रतिबन्धः । चतुर्थे च यदि पक्षधर्मतया अशरीरी उपस्थितस्तदा न विरोधः, कर्तृत्व-

---

* नैते पञ्चविधहेत्वाभासरूपाः पञ्च दोषा इति तदुपपादनाय यत्नेनालम् ।

† धर्मी ईश्वरः ।

‡ अयमभिसन्धिः, व्याप्तिलक्षणे व्याप्यतावच्छेदकधर्मान्तराघटितत्वरूपविशेषणासत्त्वात् शरीराजन्यत्वहेतोरजन्यतात्वरूपव्याप्यतावच्छेदकधर्मान्तरघटिततया व्याप्यत्वासिद्धिरिति ।

§ पक्षेति क्षित्यादिरूपपक्षेऽशरीरिकर्तृकत्वस्यैव सम्भवादित्यर्थः । विपक्षबाधकतर्कश्च उत्तरकारिकायामुक्तः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्याच्छरीरित्वसमानाधिकरणस्योपलम्भात्, तदनुपस्थापने तु न विरोधः, विरोधाश्रयस्यासिद्धेः । पञ्चमे च विपक्षबाधकतर्कसत्त्वात् तदभावनिबन्धना अज्ञानरूपाऽसिद्धिर्व्याप्यत्वासिद्धिर्वा न, शरीरजन्यत्वोपाधेरपि विपक्षबाधकाभावेनापास्तत्वात्* ॥ ॥ २ ॥

'ननु यदीश्वरः कर्ता स्यात्, शरीरी स्यादिति प्रतिकूलतर्कावतारोऽनुकूलतर्काभावश्च', तत्राह

तर्काभासतयाऽन्येषां, तर्काशुद्धिरदूषणम् ।
अनुकूलस्तु तर्कोऽत्र कार्यलोपो विभूषणम् ॥ ३ ॥

प्रतिकूलतर्कास्तावदीश्वरासिद्ध्या आश्रयासिद्धा इत्याभासाः । कर्तारं विना कार्यं न स्यादिति तर्कस्तु 'विभूषणं' उपकारकः । 'अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते' (गीता०) इत्यागमस्य† । 'आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना । यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः' (मनु० अ०१२) इति तर्कानुगृहीतस्यागमस्य बलवत्त्वम् ॥ ३ ॥

'ननु कार्यत्वं प्रयत्नजन्यत्वेऽप्रयोजकम्', अत्राह

स्वातन्त्र्ये जडताहानिः, नादृष्टं दृष्टघातकम् ।
हेत्वभावे फलाभावः, विशेषस्तु विशेषवान्‡ ॥ ४ ॥

---

* विपक्षबाधकावतारेणापास्तत्वादिति पाठान्तरम् ।

† आगमस्येत्यस्य उपकारक इत्यग्रिमेणान्वयः ।

‡ विशेषः क्रियाविशेषश्चेष्टारूपः, विशेषवान् प्रयत्नविशेषरूपहेतुमान्, तथा च 'यद्विशेषयोः कार्यकारणभावस्तत्सामान्ययोरपि' इति न्यायात् क्रियासामान्ये प्रयत्नसामान्यस्य हेतुत्वं सिध्यति ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

न हि कर्तारं हेतुं विना कार्यं*। परमाणोरेव यत्नवत्त्वेऽचैतन्यानुपपत्तिः, अचेतनस्य चेतनप्रेरितस्यैव जनकत्वात्। अदृष्टमपि दृष्टकारणसहकारेणैव फलजनकम्। न च 'चेष्टायामेव भोक्तृप्रयत्नो हेतुः, न तु क्रियासामान्ये' इति, चेष्टायां विशेषप्रयत्नस्य हेतुत्वेऽपि क्रियासामान्ये प्रयत्नसामान्यस्य कारणत्वानपायात्, अन्यथा बीजविशेषस्याङ्कुरविशेषे जनकत्वेनाङ्कुरसामान्यं प्रति बीजत्वेन हेतुताया अपि विलोपापत्तेः ॥ ४ ॥

'ननु धृत्यादीनां प्रयत्नजन्यत्वे किं मानम्' इति, अत्राह

कार्यत्वान्निरुपाधित्वमेवं धृतिविनाशयोः ।
विच्छेदेन पदस्यापि†, प्रत्ययादेश्च पूर्ववत् ॥ ५ ॥

धृतिविनाशयोः प्रयत्नजन्यत्वान्निरुपाधित्वं। विच्छेदेनान्तराप्रलयेन आदर्शाद्यभावात् अर्वाग्दर्शी नाद्यव्यवहारमूलं, व्यवहारानभिज्ञत्वादिति सर्गाद्यकालीनघटादिव्यवहारप्रवर्तकः पुरुषः सिध्यति। एवं प्रत्ययादेर्वेदजन्यधीप्रामाण्यादेरपि निरुपाधित्वम्‡।

अथ वा कार्येत्यादिकं (१का०) अन्यथा व्याख्यायते, कार्यं तात्पर्यं, तात्पर्यविषय एव शब्दप्रामाण्यमिति तात्पर्यं हि यस्य

---

* इदञ्च हेत्वभाव इत्यंशस्य विवरणम्।

† ननु घटादिव्यवहारः पूर्वपूर्वकुलालपरम्पराप्रयोज्य एवास्तु, तदर्थमीश्वरेणालमित्यत आह विच्छेदेनेति पदस्य व्यवहारस्य, अस्यापि निरुपाधित्वमित्यनेनान्वयः।

‡ अन्तराप्रलयेन तत्प्रामाण्यस्य अर्वाक्दर्शिप्रयोज्यत्वासम्भवादिति भावः।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वेदे स एवेश्वरः। आयोजनं व्याख्यानं, वेदास्तदर्थविद्भिर्व्याख्याताः महाजनपरिगृहीतवाक्यत्वात्, अव्याख्यातत्वे पदार्थानवगमेऽननुष्ठानापत्तेः, एकदेशदर्शिनस्तु व्याख्यायां नाश्वासः। एवं धृतिर्धारणं, धृत्यादेरित्यादिग्रहणात् अनुष्ठानसङ्ग्रहः*। एवमीश्वरादिपदार्थतया ईश्वरसिद्धिः, तदुक्तम् 'उद्देश एव तात्पर्यं, व्याख्या विश्वदृशः सतो। ईश्वरादिपदं सार्थं लोकवृत्तानुसारतः', उद्देश इच्छाविशेषः, एवं 'अहं सर्वस्य प्रभवः' इत्यादावहंपदं स्वतन्त्रोच्चारयितृपरं, लोकस्थले सतात्पर्यकशब्दस्यैव प्रमाणत्वात् 'य एव लौकिकास्त एव वैदिकाः' इति लौकिकाहमादिपदवदलौकिकेऽपीयमेव व्यवस्था। प्रत्ययतः विधिप्रत्ययात्, आप्ताभिप्रायो विध्यर्थः, यस्याभिप्रायः†, स एवेश्वरः॥ ५॥

प्रवृत्तिः कृतिरेवात्र, सा चेच्छातः, यतश्च सा।
तत् ज्ञानं, विषयस्तस्य विधिः, तज्ज्ञापकोऽथवा॥ ६॥

विधिजन्यज्ञानात् प्रवृत्तिर्दृश्यते, सा च इच्छातश्चिकीर्षातः, चिकीर्षा च कृतिसाध्यत्वेष्टसाधनताज्ञानात्, तज्ज्ञानस्य विषयः कार्यत्वं इष्टसाधनत्वञ्च विधिरिति प्राचां मतं, स्वमतमाह तज्ज्ञापकोऽथवेति इष्टसाधनत्वानुमापक आप्ताभिप्रायो विधिप्रत्ययार्थः॥ ६॥

---

* धारणं धारणाख्यसंस्कारः, वेदास्तदर्थविद्भृता अनुष्ठिता वेत्यादिरीत्या प्रयोगः।

† अभिप्राय इति वेदे इति शेषः।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्रवृत्तिप्रयोजकेच्छाहेतुज्ञानविषयं परिशेषयति*

इष्टहानेरनिष्टाप्तेरप्रवृत्तेर्विरोधतः ।

असत्त्वात् प्रत्ययत्यागात् कर्तृधर्मो† न सङ्करात् ॥ ७ ॥

स्पन्दस्य‡ कर्तृधर्मस्य प्रवृत्तिप्रयोजकत्वे 'आत्मानं विजानीयात्' इत्यत्राप्रवृत्तिप्रसङ्गात्, ग्रामं गच्छतीत्यतः प्रवृत्त्यापत्तेश्च। यत्नस्य विधित्वे दोषमाह अप्रवृत्तेः, आख्यातान्तरेण यत्ने बोधितेऽपीष्टसाधनत्वाप्रतिसन्धाने अनिष्टसाधनत्वज्ञाने वाऽप्रवृत्तेः। इच्छाया विधित्वे दोषमाह विरोधत इति । इच्छाया विधित्वे इच्छयैव तज्ज्ञानं जननीयं, इच्छाया ज्ञानेन चेच्छा जननीया इत्यन्योन्याश्रयः§, तदिदमुक्तं विरोधत इति। ननु 'इच्छाज्ञानं लिङा जननीयं‖' इति, अत्राह असत्त्वादिति। इच्छाज्ञाने जाते प्रवृत्तिहेतुस्वरूपसदिच्छाभावात् प्रवृत्तिर्न स्यात्, इच्छायाः स्वरूपसत्या एव प्रवृत्तिहेतुत्वात्, न च लिङ्श्रवणकाले इच्छा

---

* परिशेषयति इतरस्मिन् बाधप्रदर्शनेन परिशेषात् 'आप्ताभिप्राय एव विध्यर्थः' इति व्यवस्थापयति ।

† विध्यर्थ इति शेषः ।

‡ स्पन्दस्य चेष्टादिरूपक्रियायाः । अयं भावः, स्वज्ञानद्वारा प्रवृत्तौ प्रयोजको यः, स एव विध्यर्थ इत्यविवादं, तत्र क्रियाया तथात्वे ज्ञानस्य क्रियात्वाभावेन विजानीयादित्यादौ प्रवृत्त्यनुपपत्तिः, गच्छतीत्यादौ तु गमनक्रियाया अवगमात् प्रवृत्त्यापत्तिश्चेति ।

§ अयं भावः, विध्यर्थज्ञानेनैव जायमाना इच्छा प्रवर्तयतीति नियमात् प्रवृत्त्यनुकूला इच्छा विध्यर्थज्ञानमपेक्षते, इच्छारूपविध्यर्थज्ञानञ्च मानसप्रत्यक्षरूपं स्वविषयमिच्छामपेक्षते इत्यन्योन्याश्रयः ।

‖ तथा च इच्छाया शाब्दबोधः, स च न स्वविषयमिच्छामपेक्षते इति न दोषः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्वरूपसतीत्यर्थः। 'ननु लिङेव इच्छाजनिका' इति, अत्राह प्रत्ययत्यागादिति। इच्छाकारणत्वेन गृहीतस्य प्रत्ययस्य ज्ञानस्य कारणस्य त्यागापत्तेः व्यभिचारादित्यर्थः*। 'लिङ्श्रुतिकाले सुखत्वादिप्रकारकधीजन्येच्छा लिङर्थः†' इति, अत्राह सङ्करादिति। इष्टसाधनताज्ञानस्य उपायेच्छाहेतोरवश्यंस्वीकारात्, तत्र‡ च कारणान्तराभावात् लिङ्पदमेव कारणम्, अतः फलेच्छाज्ञानं न प्रवृत्तिहेतुः, तद्विनापि प्रवृत्तिसम्भवात्, तथाच सङ्करात् इष्टसाधनत्वज्ञानरूपसाधनसहचारत्वात्, इच्छाज्ञानस्येच्छाजनकत्वे मानाभावेन तस्य लिङ्पदजन्यत्वे मानाभावाच्चेति ॥ ७ ॥

'ननु यत्नज्ञानमेव प्रवर्तकमस्तु, आख्यातान्तरञ्च न यत्नवाचकम्, अनुकूलव्यापारमात्र एव आख्यातशक्तेः, रथो गच्छतीत्यादौ तथाकल्पनात्', तत्राह

कृताकृतविभागेन कर्तृरूपव्यवस्थया।
यत्न एव कृतिः, पूर्वा परस्मिन् सैव भावना ॥ ८ ॥

---

* अत्रायमाशयः, नियतपूर्ववर्तिन एव कारणत्वात् इष्टसाधनताज्ञानरूपप्रसिद्धकारणाभावेऽपि केवलं लिङा इच्छोत्पत्तौ तस्य नियतपूर्ववर्तित्वाभावप्रसङ्गेन कारणतैव न स्यादिति।

† 'फलेच्छाज्ञानं उपायेच्छां प्रति कारणं' इति मतमाश्रित्येदं, तथा च सुखरूपमुख्यफलेच्छा विध्यर्थस्तज्ज्ञानञ्च उपायेच्छायां हेतुः, सा च प्रवृत्ताविति नोक्तदोषावसर इति पूर्वपक्षः। सिद्धान्तस्तु, फलेच्छाज्ञानस्य उपायेच्छां प्रति कारणतायां प्रमाणाभावेन नोक्तप्रक्रियासम्भव इति।

‡ तत्र इष्टसाधनताज्ञाने।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

घटः कृतोऽङ्कुरो न कृत इति व्यवहारात्* कुलालादिः कर्ता न कारकान्तरमिति कृञ्धात्वर्थः कृतिः†। 'ननु यत्नपर्यायता‡ स्यात्', अत आह पूर्वेति। परस्मिन्नुत्तरकालवर्तिनि फले विद्यमाने, सैव कृतिरेव, पूर्वा साधनीभूता, भावना, फलानुकूलतापन्नयत्न एवाख्यातार्थः। यद्वा फलानुकूलव्यापारधात्वर्थप्रचयजनिका पूर्वापरस्मिन् पूर्वापरीभूतत्वे सति, कृतिराख्यातार्थः, तथा च प्रयत्नवत्त्वमनुकूलत्वं पूर्वापरीभूतत्वमिति त्रयमर्थः§ ॥ ८ ॥

'ननु धातुना यत्नः प्रतीयते, आख्यातस्य च अनुकूलव्यापारमात्रार्थकत्वम्, आक्षेपादेव च यत्नलाभः||' इति, अत आह

---

* अयं भावः, करोतेरनुकूलव्यापारार्थकत्वेऽङ्कुरादावपि अस्मदादीनां साक्षात् परम्परया वाऽनुकूलव्यापारसत्त्वादयं व्यवहारो नोपपद्यते, प्रयत्नार्थकत्वे च घटाङ्कुरयोर्यथाक्रमं अस्मदादीनां कर्तृताप्रयोजकप्रयत्नसत्त्वासत्त्वाभ्यामुपपन्नोऽयं व्यवहारः, अत एव च घटानुकूलव्यापारवतामपि दण्डादीनां प्रयत्नाभावात् न कर्तृत्वं किन्तु कुलालस्यैवेति।

† तथा च य एव करोतेरर्थः स एवाख्यातस्यापीति कृतिरेवाख्यातार्थ इति शेषः।

‡ आख्यातस्येति शेषः।

§ एतादृशविशिष्टार्थकल्पनायां शक्यतावच्छेदकगौरवादिदोषप्रसङ्गादिति शेषः। विशिष्टार्थलाभस्तु परस्परमन्वयबलादिति भावः।

|| कृञ्धातोर्यत्नार्थत्वेऽपि नाख्यातार्थो यत्नः, आख्यातस्थले यत्नबोधस्तु 'तस्य तदनुकूलव्यापारस्तस्य तस्मिन् यत्नं विनाऽनुपपन्नः' इत्याक्षेपादेवेति पूर्वपक्षः।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

भावनैव हि यत्नात्मा सर्वाख्यातस्य गोचरः।
तया विवरणध्रौव्यादाक्षेपानुपपत्तितः ॥ ८ ॥

तया कृत्या तद्वाचकपदेन, पचति पाकं करोतीति विवरणात् तत्र शक्तिः, अनुकूलव्यापारस्य यत्नानाक्षेपकत्वात्, वर्तमानपाकानुकूलव्यापारस्याचेतनेऽपि भावात्। ओदनमितिकर्मपदोत्तरं पचति भुङ्क्ते वेति जिज्ञासा च कर्मणः कृतिव्याप्यत्वप्रतिसन्धानेन* यथा पचतीत्यनन्तरं कर्मादौ जिज्ञासा ॥ ८ ॥

'ननु कर्तुरपि विवरणात् तत्रापि शक्तिराख्यातस्य स्यात्', तत्राह

आक्षेपलभ्ये संख्येये नाभिधानस्य कल्पना।
संख्येयमात्रलाभे तु साकाङ्क्षेण व्यवस्थितिः ॥ १० ॥

आख्यातवाच्यया संख्यया आश्रयस्य आक्षेपादेव लाभान्न कर्तरि शक्तिकल्पना†, प्रथमान्तपदोपस्थाप्यत्वे सति आख्यातार्थविशेष्यत्वमाक्षेपलभ्यत्वं, भुक्त्वा इत्यादौ क्त्वान्तार्थानन्तर्यवारणाय विशेष्यदलम्, सुप्यते इत्यादौ वर्तमानत्वविशेष्यत्वं स्वापस्यापीति सत्यन्तदलम्। चैत्रस्तण्डुलं पचतीत्यत्र द्वितीयार्थकर्मतावरुद्धत्वात् तण्डुलस्य, न तत्र भावनाऽऽकाङ्क्षेति भावना

---

* न त्वनुकूलव्यापारस्य यत्नाक्षेपकतया, कर्मादाविति कृतेः कर्मादिव्यापकत्वप्रतिसन्धानेनेति शेषः। अयं भावः, कर्मणः कृतिव्याप्यतया कर्मण्येव सामान्यतः कृत्युपस्थितौ सत्यां 'पचति भुङ्क्ते वा' इति भवति कृतिविशेषजिज्ञासा, सामान्यप्रकारकज्ञानस्य विशेषजिज्ञासाहेतुत्वादिति।

† 'अनन्यलभ्यः शब्दार्थः' इति नियमात्।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

शुद्धप्रातिपदिकार्थान्वयिनी, अतएव 'यं यं भावनाऽन्वेति, तं तं सङ्ख्याऽपि' इति, एकपदोपात्तभावनान्वयबलात्, कर्त्रादिसङ्ख्याभिधान एव च प्रथमेति। एवं कर्मापि नाख्यातपदवाच्यम्* ॥ १० ॥

'नन्वस्तु कर्मधर्मो विधिः', तत्राह

अतिप्रसङ्गान्न फलं, नापूर्वं तत्त्वहानितः ।
तदलाभान्न कार्यञ्च, न क्रियाऽप्यप्रवृत्तितः ॥ ११ ॥

कर्म स्वर्गादि, तद्धर्मः कार्यत्वं यदि विध्यर्थः, तत्राह अतिप्रसङ्गान्न फलं। स्वर्गे कार्यत्वज्ञाने सति स्वर्गासाधनेऽपि प्रवृत्त्यापत्तेः। यदि कर्म अपूर्वं, तद्धर्मः कार्यत्वं विध्यर्थः, तत्राह नापूर्वं तत्त्वहानितः। शाब्दबोधात् पूर्वं नोपस्थितमित्यत एवापूर्वं, पूर्वमुपस्थितौ च न तत्त्वम्, अनुपस्थितौ च कथं तत्र शक्तिधीः। 'ननु कार्यत्वरूपेण शक्तिधीः, शाब्दबोधे तु योग्यतया अपूर्वस्य कार्यविशेषस्य भानं', तत्राह तदलाभान्न कार्यञ्चेति। नित्यनिषेधापूर्वयोरलाभप्रसङ्गात्, तत्र फलकामस्य नियोज्यत्वस्याभावात्†। यद्वा 'ननु कार्यत्वेनोपलक्षितायामपूर्वव्यक्तौ शक्तिग्रहः, गन्धवत्त्वेनोपलक्षितायां पृथिवीत्वविशिष्टायां व्यक्तौ पृथिवी-

---

* अस्य 'ग्रामो गम्यते इत्यादिकर्माख्यातस्थले' इति आदि।

† अयं भावः, काम्यस्थले काम्यरूपभविष्यत्स्वर्गादिफलसाधनत्वेन उपस्थितानां यागादीनामाशुविनाशिनां तत्साधनत्वासम्भवेन तदन्यथानुपपत्त्याऽपूर्वं कल्प्यतां, नित्यस्य निषेधस्य च फलाभावेन तत्रापूर्वकल्पनायां प्रमाणाभावात् 'सन्ध्यामुपासीत' 'अष्टम्यां मांसं नाश्नीयात्' (इति नित्यनिषेधस्थलीयविधिप्रत्ययस्य निरर्थकत्वापत्तिरिति।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पदस्येव*', इत्यत्राह तदलाभात्। अपूर्वत्वविशिष्टापूर्वव्यक्त्यनुपस्थितेः, गन्धवत्त्वेनापि हि पृथिवीत्वविशिष्टस्य स्मरणमनुमानं वा सम्भवति, प्रागनुभवात्, प्रकृते तथात्वेऽपूर्वत्वव्याघातादित्यर्थः। 'ननु कर्म यागादि, तद्धर्मः कार्यत्वं विधिः', तत्राह न क्रियापीति। अनिष्टसाधनताधीकाले प्रवृत्त्यदर्शनात्। अत्र अपिना नापूर्वमपि, उक्तदोषादित्यर्थः॥ ११॥

'ननु करणं शब्दः, तद्धर्मोऽभिधा, तज्ज्ञानं प्रवर्तकम्', अत एवाहुः "अभिधां भावनामाहुरन्यामेव लिङादयः। अर्थात्मभावना त्वन्या सर्वाख्यातस्य गोचरः", अभिधा यागप्रवर्तिका इतिधीः शब्दात्, आख्यातार्थस्तु उत्पादना उत्पत्त्यनुकूलक्रियारूपा' इति, अत्राह

असत्त्वादप्रवृत्तेश्च नाभिधाऽपि गरीयसी।
बाधकस्य समानत्वात् परिशेषोऽपि दुर्लभः॥ १२॥

अभिधायां मानाभावात्, अभिधाशब्दतोऽभिधाज्ञानेऽपि अप्रवृत्तेः, गरीयसी उचिता, लिङर्थतयेति शेषः। 'ननु अन्यस्य

---

* यथा हि 'गन्धवती पृथिवीपदशक्या' इत्युपलक्षणविधया शक्तिग्रहः, न तु 'गन्धवत्त्वेन गन्धवती पृथिवीपदशक्या' इति गन्धवत्त्वं शक्यतावच्छेदकीकृत्य शक्तिग्रहः, तथा कार्यत्वेन कार्यं विधिशक्यमिति न शक्तिधीः, किन्तु कार्यं विधिशक्यमिति उपलक्षणविधयेति भावः। सिद्धान्तस्तु पृथिवीत्वजातेः प्रागुपस्थितिसत्त्वेन तस्य शक्यतावच्छेदकत्वे लाघवप्रतिसन्धानात् गन्धवत्त्वस्य उपलक्षणविधयैव भानं, प्रकृतेऽपूर्वत्वस्य प्रागनुपस्थित्या नैवं सम्भवतीति।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

लिङर्थत्वे बाधात् परिशेषेणाभिधा लिङर्थः' इति, अत्राह बाधकस्येति । प्रकृतेऽपि बाधकसम्भवात्* ॥ १२ ॥

'ननु करणस्य यागादेर्धर्म इष्टसाधनत्वं विध्यर्थोऽस्तु' तत्राह

हेतुत्वादनुमानाच्च मध्यमादौ वियोगतः ।
अन्यत्र क्लृप्तसामर्थ्यान्निषेधानुपपत्तितः ॥ १३ ॥

विध्यर्थस्य इष्टसाधनताया 'हेतुत्वात्' लिङ्गतयोपन्यासात्, न च स्वस्य स्वलिङ्गत्वमिति, अग्निकामो दारुणी मथ्नीयादित्युक्ते कुत इत्याकाङ्क्षायां वक्तारो वदन्ति यतो दारुद्वयमथनमग्निसाधनमिति । 'अनुमानात्' अर्थवादादिष्टसाधनताबोधानन्तरमपि विधेरनुमानात्, यदि चानुमितेनापि विधिना इष्टसाधनत्वमेव बोध्यम्, तदा तदनुमानवैयर्थ्यम्, 'तरति मृत्युं, तरति ब्रह्महत्याम्[†]' इत्यादौ मृत्युब्रह्महत्यासन्तरणकामोऽश्वमेधेन यजे-

---

* मीमांसकमतेनेदम्, तन्मतं यथा, धात्वर्थोत्पादानुकूलो व्यापारो भावना, सा च अर्थभावना शब्दभावना चेति द्विधा, तत्राद्या फलभावनापदाभिधेया कर्तृनिष्ठा प्रयत्नादिरूपा आख्यातप्रत्ययसामान्यस्यार्थः, अस्यास्त्रांशत्रयमस्ति, तथा हि 'स्वर्गकामो यजेत' इत्यादावाख्यातेन भावनायामुपस्थितायां किं भावयेत्, केन भावयेत्, कथं भावयेदित्याकाङ्क्षायां स्वर्गकामपदादिभिः, 'स्वर्गं भावयेत्, यागेन भावयेत्, अग्न्याधानादिभिरुपकारं सम्पाद्य भावयेत्' इतिरीत्या भाव्यकरणेतिकर्तव्यतासमन्वय इति भाव्याद्यंशत्रयवतीयम् । शब्दभावना च अविधापदाभिधेया वैदिकशब्दनिष्ठा लिङादिरूपविधिप्रत्ययमात्रगम्या, अस्याश्च अर्थभावना भाव्या, विधिलिङादि करणं, आर्थवादिकी स्तुतिरितिकर्तव्यतेत्येषाऽपि भाव्याद्यंशत्रयवतीत्यलमधिकेन ।

† अस्य 'योऽश्वमेधेन यजते' इति शेषः । इत्यादाविति अत्र 'इष्टसाधनताबोधान्तरमपि' इति पूरणीयम् ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तेतिविध्यनुमानस्य सर्वतन्त्रसिद्धत्वात्*। 'मध्यमादौ वियोगतः' मध्यमोत्तमपुरुषे लिङ इष्टसाधनतावियोगात्, कुर्याः कुर्यामित्यत्राज्ञादिकं† प्रतीयते, आज्ञा तु अभिप्राय एव इति प्रथमपुरुषेऽपि इच्छा अर्थः। 'अन्यत्र क्लृप्तसामर्थ्यात्' अध्येषणादिलिङाम् इच्छावाचकत्वकल्पनात्‡। 'निषेधानुपपत्तितः' 'न कलञ्जं भक्षयेत्' इत्यत्रेष्टसाधनत्वनिषेधस्य बाधितत्वात्§। बलवदनिष्टाननुबन्धित्वञ्च न विध्यर्थः, 'श्येनेनाभिचरन् यजेत' इत्यादौ असम्भवात्‖, अप्रवर्तमानपुरुषस्य च बलवद्द्वेषविषयत्वात् बलवद्द्वेषविषयदुःखजनकत्वसामान्याभावस्य बाधितत्वादिति ॥ १३ ॥

स्वमतमाह

---

* सर्वतन्त्रसिद्धत्वात् सर्वतन्त्रसिद्धान्तसिद्धत्वात्, स च 'सर्वतन्त्राविरुद्धस्तन्त्रेऽधिकृतः सर्वतन्त्रसिद्धान्तः' इति न्यायसूत्रे (१अ०।१आ०। ५प्र०) दर्शितः।

† आदिना सङ्कल्पपरिग्रहः, अनुपदमनुष्ठीयमानकर्मणः स्वान्यकर्तव्यत्वेनेच्छा आज्ञा, स्वकर्तव्यतयाऽभिप्रायस्तु सङ्कल्पः। केचित्तु 'आज्ञा त्वभिप्राय एव' इत्युत्तरग्रन्थदृष्ट्या आदिपदमत्र नास्तीत्यनुमिमते।

‡ सत्कारपुरःसरनियोगेच्छा अध्येषणा, यथा गुरो मामध्यापय इत्यादौ।

§ अयं भावः, एतन्मते नञर्थविशेष्यकान्वयस्यात्रासम्भवेन 'नञ्-राहित्ये यस्य विधेयत्वं, नञा तदभाव एवावगम्यते' इतिनियमानुसारेण प्रकृते कलञ्जभक्षणं नेष्टसाधनं इत्येवार्थो वर्णनीयः, स च न सम्भवति, कलञ्जभक्षणस्य तृप्तिरूपेष्टसाधनतया तत्र तदभावविरहादिति।

‖ अयमाशयः, श्येनेन हि शत्रुक्षयार्थतया हिंसारूपेण शत्रुक्षय इव नरकोऽपि भवति, स च बलवान् अनिष्ट इति तदनुबन्धिनि श्येने कुतस्तदभाव इति।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

विधिर्वक्तुरभिप्रायः प्रवृत्त्यादौ लिङादिभिः ।
अभिधेयोऽनुमेया तु कर्तुरिष्टाभ्युपायता ॥ १४ ॥

प्रवृत्तिनिवृत्तिविषये आप्ताभिप्रायः लिङादिभिः प्रत्ययैरभिधेयः, इष्टसाधनता त्वनुमेया । वस्तुतस्तु ईश्वरेच्छायाः सर्वविषयकत्वात् निषेधे बाधः, बलवदनिष्टाननुबन्धित्वेनेच्छायाः शक्यत्वे गौरवमिति प्राचीनमतमेव साधीयः* ॥ १४ ॥

* वक्त्रभिप्रायस्य विध्यर्थत्वे वैदिकविधिप्रत्ययस्य वक्तुरीश्वरस्याभिप्राय एवार्थः, अभिप्रायस्त्विच्छैव इति 'न कलञ्जं भक्षयेत्' इत्यादौ कलञ्जभक्षणं नेश्वरेच्छाविषय इत्येवार्थो वक्तव्यः, स च बाधितः, कार्यसामान्यं प्रत्येव ईश्वरेच्छाया हेतुतया कलञ्जभक्षणेऽपि तदनपायात् निषेधस्थले बाध इति तात्पर्यम् ।

अत्रेदं बोध्यं, व्युत्पत्तिवैचित्र्येण विधिसमभिव्याहृतनञर्थः विशेष्यतयैवान्वेतीति कलञ्जभक्षणाभाव ईश्वराभिप्रेत इत्येवात्रान्वयः, 'यदीच्छेद्विष्णुना वासं पुत्रसम्पदमात्मनः । एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि' इत्यादिकाम्यनिषेधविधिस्थले नित्यनिषेधस्य फलवत्त्वे च नञर्थविशेष्यकान्वयस्य सिद्धत्वात् । यद्वा विध्यर्थस्येच्छाया विषयतासम्बन्धेन धात्वर्थे नान्वयः, किन्तु धात्वर्थतावच्छेदकरूपेण धात्वर्थे उद्देश्यतासंसर्गेणैवेति, तथा च कलञ्जभक्षणस्य कार्यत्वेन ईश्वरेच्छाविषयत्वेऽपि विशेषतस्तदिच्छोद्देश्यत्वाभावान्निषेधोपपत्तिः । यदि च, 'इच्छा सामान्यं नाभिप्रायः, किन्तु कृपावत् इच्छाविशेष एवाभिप्रायः, स च अन्येच्छाद्यनधीनः कर्तव्यत्वेनेच्छारूपः, इच्छात्वव्याप्याभिप्रायत्वजातिमान् वा, अतएव 'अगत्या मयेदं कृतं न तु ममाभिप्रेतमिदम्' इत्यादिप्रयोगः' इत्यादिकं विभाव्यते, तदा प्रतिषिद्धक्रियायामीश्वराभिप्रायाभावात् निषेधस्थले बाधाशङ्कैव नोदेति । 'श्येनेनाभिचरन् यजेत' इत्यादावभिचारस्य सामान्यतः कर्तव्यत्वेनेश्वरेच्छाभावेऽपि जिघांसोः कर्तव्यत्वेन तदभिप्रायोऽस्त्येवेति न दोषः, अतएव मीमांसाभाष्ये (१अ०।१पा०।२सू०) 'कथं पुनरनर्थः कर्तव्यतयोपदिश्यते ?' इति पूर्वपक्षयित्वा 'उच्यते, नैव श्येनादयः कर्तव्या विज्ञायन्ते, यो हि

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

श्रुतेरित्यस्य व्याख्यान्तरमाह

कृत्स्न एव च वेदोऽयं परमेश्वरगोचरः ।
स्वार्थद्वारैव तात्पर्यं तस्य स्वर्गादिवद्विधौ ॥ १५ ॥

सर्वत्र वेदभागे ईश्वरः प्रतिपादितः, 'यज्ञो वै विष्णुः' (तै॰सं॰) 'पश्यत्यचक्षुः'(श्वे॰उ॰) इत्यादिश्रुतिषु 'एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः' (वृहदा॰) इत्यादिषु च, न तु सिद्धार्थतया अमीषामन्यत्र तात्पर्यं, यथा स्वर्गनरकादिबोधकानां, तथा 'ईश्वरमुपासीत' इतिविध्येकवाक्यतया तेषां त्वन्मतेऽपि प्रामाण्यमेव, अन्यथा स्वर्गादिपदानामपि स्वार्थे प्रामाण्यं न स्यात्, तदेतदुक्तं स्वार्थद्वारैवेति। स्वार्थप्रतिपादनद्वारा एव विधौ सिद्धार्थतात्पर्यात्*। 'वाक्यात्', वैदिकप्रशंसानिन्दा-

हिंसितुमिच्छेत्, तस्यायमभ्युपाय इति हि तेषामुपदेष्टारः, "श्येनेनाभिचरन् यजेत" इति हि समामनन्ति, न त्वभिचरितव्यमिति' इति शबरस्वामिनः समादधिरे। यच्च बलवदनिष्टेत्यादिकं नव्यैरनुक्तमपि उक्तमिति कृत्वा गौरवमभिहितं, तदपि प्राचीनमतापेक्षया लाघवमेव, बलवदनिष्टेत्यादिकमप्यपेक्षमाणस्य तन्मतस्य गुरुतरत्वादिति प्राचीनदोषदुष्टमपि प्राचीनमतं प्राचीनानामेव साधीयः, नव्यानां पुनर्नवीनसरणिरेवानुसरणीयेत्यलम् ।

* अयं निष्कर्षः, क्रियाबोधनायैव प्रवृत्तस्य वेदस्य यदंशे क्रिया नावगम्यते, भूतार्थादिबोधकस्य तस्य न स्वार्थे प्रामाण्यं परन्तु विध्यंश एव तात्पर्यमिति 'यज्ञो वै विष्णुः' इत्यादिविध्यनात्मकश्रुतेर्भूतार्थतया न स्वार्थे प्रामाण्यमिति कथमनया ईश्वरसिद्धिरिति मीमांसकाशङ्का। अत्र च तन्मतमाश्रित्यैवायं सिद्धान्तः, 'यन्न दुःखेन सम्भिन्नम्' इत्यादीनां भूतार्थानामपि स्वर्गादिबोधकवाक्यानां 'स्वर्गकामो यजेत' इत्यादिविध्येकवाक्यतया यथा स्वार्थे प्रामाण्यं स्वीकृतम्, तथा 'ईश्वरमुपासीत' इत्यादिविध्येकवाक्यतयैव 'यज्ञो वै विष्णुः' इत्यादीश्वरप्रतिपादकवाक्यानां प्रामाण्यमकामेनाप्यङ्गीकार्यमिति ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वाक्यानि प्रशंसानिन्दाज्ञानपूर्वकाणि प्रशंसानिन्दावादवाक्यत्वात् परिणतिसुरससाम्रफलमित्यादिवत् ॥ १५ ॥

संख्याविशेषादित्यस्य व्याख्यान्तरमाह

स्यामभूवं भविष्यामीत्यादौ संख्या प्रवक्तृगा ।
समाख्याऽपि च शाखानां नाद्यप्रवचनादृते ॥ १६ ॥

वैदिकोत्तमपुरुषेण स्वतन्त्रोच्चारयितुः सङ्ख्या वाच्या, 'तत् ऐचत एकोऽहं बहु स्याम्' (छान्दो०) इत्यादिबहुषु उत्तमपुरुषश्रुतेः। सङ्ख्यापदार्थमन्यमाह* समाख्येत्यादि । सर्वासां शाखानां हि काठककाखापकाद्याः समाख्याः संज्ञाविशेषाः श्रूयन्ते, ते च नाध्ययनमात्रनिबन्धनाः, अध्येतृणामानन्त्यात् †आदावन्यैरपि तदध्ययनात्, तस्मादतीन्द्रियार्थदर्शी भगवानेव कारुणिकः सर्गादावस्मदाद्यदृष्टाकृष्टकाठकादिशरीरविशेषमधिष्ठाय यां शाखामुक्तवान् तस्याः शाखायास्तन्नाम्ना व्यवदेश इति सिद्धमीश्वरमननं मोचहेतुः ॥ १६ ॥

यस्येश्वरे न विश्वासस्तं प्रत्याह

इत्येवं श्रुतिनीतिसंप्लवजलैर्भूयोभिराचालिते
येषां नास्पदमादधासि हृदये ते शैलसाराशयाः ।
किन्तु प्रस्तुतविप्रतीपविधयोऽप्युच्चैर्भवच्चिन्तकाः
काले कारुणिक त्वयैव कृपया ते तारणीया नराः ॥ १७ ॥

इतिशब्दः स्वरूपे, एवंशब्दः प्रकारार्थः, शैलसारः लोहं,

---

* अन्यं 'संख्यायते विशेषेण ज्ञाप्यतेऽनया' इति व्युत्पत्तिबललभ्यं समाख्यारूपमपरमर्थम्। † अनादाविति पाठे संसार इति शेषः।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अतिकठिनशिला वा। प्रस्तुते ईश्वरे विप्रतीपविधयः प्रतिकूलपराः, तादृशा अपि उच्चैरतिशयेन काले भवच्चिन्तकाः, शङ्काकलङ्कशून्याः कार्याः ॥ १७ ॥

अस्माकन्तु निसर्गसुन्दर चिराच्चेतो निमग्नं त्वयि
त्वद्भानन्दनिधौ तथापि तरलं नाद्यापि सन्तृप्यते।
तन्नाथ त्वरितं विधेहि करुणां येन त्वदेकाग्रतां
याते चेतसि नाप्नुवाम शतशो याम्याः पुनर्यातनाः ॥१८॥

अद्धा तत्त्वं, सन्तृप्यत इति कर्मकर्त्तरि* ।

इत्येष नीतिकुसुमाञ्जलिरुज्ज्वलश्री-
र्यद्वासयेदपि च दक्षिणवामकौ† द्वौ।
नो वा, ततः किममरेशगुरोर्गुरुस्तु
प्रीतोऽस्त्वनेन पदपीठसमर्पणेन ॥ १९ ॥

इति पञ्चमः स्तवकः ।

नो वासयेत् ततः किमस्माकम्।

इति श्रीहरिदासभट्टाचार्यविरचितकुसुमाञ्जलिकारिका-
व्याख्यानं समाप्तम् ॥

---

* कर्मकर्तरीति लट्प्रत्ययनिष्पन्नमिति शेषः। तथा च यत् चेतो संटप्नोषि तत् स्वयमेव संटप्यते नेत्यर्थः।

† अमरेशगुरोर्दक्षिणवामकौ तत्तत्त्वस्वीकारेऽनुकूलप्रतिकूलपक्षौ, अथ च दक्षिणवामकराविति श्लेषः। अमरेशगुरोर्बृहस्पतेरपि गुरुरिति वाऽन्वयः।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE